1417

M. T. B. COLLEGE, SURAT
Manuscripts Library

No. Ref.
Ser. 600

Title: Bhashya

600

600

भाष्य (?)

Incomplete

Bhāshya (?)	Title
	Author
	Editor
	Year, Vols.
	Publisher
600	Remarks

सिद्धिः॥ यदि चाभासोसत्तिकदाचीनानामप्यपनमनानामप्यभिलषितार्थसिद्धिरभावस्य सत्त्वभत्वादिति॥० ना
भावउपलब्धेः॥ सोयंतिक्रमतेन निराकृते योगाचारो विज्ञानवादी बौद्धः प्रत्यवतिष्ठते शमथविपश्यनायुगन
द्धवाही मार्गो योग इति योगलक्षणं शमथो निःसमाधिकश्चलो विपश्यना सम्यग्दर्शनलक्षणाः यथायुगनद्धौ बली
वर्दौ वहतस्तथायं मार्गः सम्यग्दर्शनवाहीः सयोगस्तेनाचरतीति योगाचार उच्यते। किंपुनः सम्यग्दर्शनं स
र्वं बाह्यार्थशून्यं विज्ञानं सर्वं क्षणिकं सर्वं निरात्मकमिति। कथं पुनर्विज्ञानमात्रं प्रतिज्ञायते। साकारं सत्स्वयं च
विज्ञानं नीलं पीतमिति हि साकारं विज्ञानमेव प्रकाशते। प्रत्यक्षं च तत्। प्रदीपवत् प्रकाशकत्वात् प्रत्यक्षो
यस्योपलंभस्तस्य स्वपरासन्नयोर्विज्ञानयोरविशेषप्रसंगोस्ति च विशेषः स्वासन्नेन विज्ञानेन प्रवृत्तिलक्ष
णं व्यवहारं पुरुषो निर्वर्तयति तथा चोक्तं विभिन्नलक्षणा अप्रत्यक्षोपलंभस्य नार्थदृष्टिः प्रसिद्ध्यति अवि
भागोपि बुद्ध्यात्मा विपर्यासितदर्शनैः। ग्राह्यग्राहकसंवित्तिभेदवानिव लक्ष्यत इति। न च ग्राह्याकारः प्रमे
यं ग्राहकाकारः प्रमाणं स्वसंवित्तिः फलमिति त्रयमेकस्मिन्विज्ञानेऽवकल्प्यते तस्मान्नास्ति बाह्यार्थः
इतश्च सहोपलंभनियमान्नभेदो नीलतद्धियोर्यदेव नीलज्ञानं तदेव नीलज्ञानं देवनीलमुपलभ्यते तस्मा
दनयोरभेद इति न श्वबाह्यार्थस्योपजायते प्रत्ययस्तस्य मप्रत्ययवद्यदवदामोन बाह्यस्याभावः कस्मादनुपल
ब्धेः सहि बाह्यदेशसंबंधः प्रत्यक्षमुपलभ्यते पावकः पर्वते पृथिवी सलिलमित्याकारवान्निराकारं च
विज्ञानं मम तद्देशे हंकारसमारूढं विज्ञानमात्मापरोक्षमवप्रत्यते तयोर्ज्ञानज्ञेययोर्भिन्नदेशयोरनु

भ॰ द्वि॰

भूयमानयोः कथमैक्यमाश्रीयते क्षीरोदकयोस्तु परस्परसंसर्गात् स्यादेकत्वाभिमानः प्रत्यक्षयद्दर्शनविज्ञा
नस्यास्माकमप्यभीष्टमेव न पुनः पूर्वमेव विज्ञानं प्रत्यक्षमनुभूयते ग्राह्याकारोल्लेखपूर्वमनन्तरेण ग्रा
ह्याकारपरः स्वरमेवाहि संवेद्यतिरपरोक्षाभवति घटसंवेदनं पटसंवेदनमिति हि वेद्याकारपूर्वकमेव संवेद
नं निर्दिश्यते यदुक्तं सहोपलंभनियमादिति तदनिरूपिताभिधानं सहत्वं नामैकदेशवर्तित्वमेककाल
वर्तित्वं वा द्वयोर्भिन्नयोः पदार्थयोस्तत्र च भिन्नोपलंभनियमादिति हेत्वर्थः अभेद इति च प्रतिज्ञा सोयं
प्रतिज्ञाहेत्वोर्विरोधः प्रतिज्ञायां सत्यां हेतुर्बाध्यते न स्मिन्प्रतिज्ञा बाध्यत इति न च दृष्टान्तोस्ति ग्राह्य
ग्राहकयोर्भेदस्य वैष्टो मीमांसकैः वैधर्म्यात्तु न स्वप्नादिवत्॥ यदुक्तं स्वप्नवदिति तत्रोच्यते स्वप्नमृग
तृष्णादिवद्भवितुं जाग्रत्प्रत्ययो नार्हति वैधर्म्यात् न चाहि निद्राकारणदोषो वा ग्रहणे प्रबुद्धस्य बाध्यते
न च प्रत्ययत्वात् स्वप्नप्रत्ययवदस्य मिथ्यात्वं यदि च प्रत्ययत्वं मिथ्यात्वं न रभिमेयतः स्वप्नज्ञान
स्य मिथ्यात्वमसिद्धं प्रबोधप्रत्ययस्य बाधस्यापि मिथ्यात्वात् दृष्टान्ताभावः तस्मात् जाग्रत्प्रत्ययस्य
मिथ्यात्वमानेन साधयितमशक्यं प्रत्यक्षानुभवबाधितः स्यात् येन बौद्धमतावलंबिनो भयावादि
नस्तेष्यनेन न्यायेन सच्चकारेणैव निरस्ताविदितव्याः यदि बाह्योर्थो नास्ति प्रेतः स्यात् किमर्थमिदं

यत्नेन सूत्रकारो यमन्यासेन्यस्मिन्नस्त्वापि निवस्तत्वं तैरेसनति विज्ञानमात्रं न ध्यते सतिपुनरासमन्तत्वेपुनरात्मतत्वे
प्रपंचापत्त्वापद्दति कोयं न्यायो यदन्यस्मिन् प्रतिपन्ने न्यत्रेष्यत इति प्रत्युत नग्नकाप्पंतात् पृथिव्यादीनां त
थात्वमेव युक्तं यस्तु प्रत्यक्षादीनां स्वतो मिथ्यात्वं नास्ति परतस्तु मिथ्यात्वमिति किं विशेष्योच्यते ननु स
र्वत्र स्वभावाद्वापि परतएव मिथ्यात्वं गम्यते न स्वतो न हि रजतज्ञानेन शुक्तिमिथ्यात्वं गृह्यते तत्र चागमस्या
बाधकस्य निःप्रत्यक्षादीनां सर्वदा मिथ्यात्वमेव स्यात् न कदाचित्तथात्वमिति प्रथमपादे प्रत्यक्षादिप्रामा
णायनिरूपणं चोदनाप्रामाण्यप्रसिद्ध्यर्थं यत्तदुदके विशीर्णं स्यादुपवर्षाचार्यस्य शास्त्रसंप्रदायप्रवर्तक
स्यानुवैचित्र्यकृतमेव च ज्ञानवैचित्र्यं न स्वतो निराकारत्वात् ज्ञानानुवासनानिबन्धनत्वं तस्यादित्याशङ्क्य
निराकरोति न भावोनुपलब्धेः॥ वासनानां न भावो नुपलब्धघटादिज्ञानानलब्धेः प्रमाणाभावादि
त्यर्थोयत् किलालयविज्ञानमहंप्रत्ययाख्यं तत्र घटादिज्ञानैर्वासनाः आधीयन्ते ताभ्यश्च घटादिज्ञा
नानीति परस्परहेतुभावेन विज्ञानवासनाचक्रं प्रवर्तत इति तदयुक्तं विज्ञानस्कंधमात्रवादिनः
कुतो व्यतिरिक्ता वासना तदभ्युपगमे विज्ञानवादहानिरालयज्ञानस्य च क्षणिकत्वात् आधारत्वं
नोपपद्यते किं चानुभवजनितः संस्कारः स्मृतिहेतुर्भासते न पुनराकारवैचित्र्ये तस्याः
सामर्थ्यं कल्पयितुं शक्यं सर्वथा विचार्यते तथा सिकताकूलवदवदीर्यत इत्यलं तनुपेक्ष्णीयं॰

भ० द्वि०

अथसौगतमतंदर्शनं० विज्ञानवादनिराकरणेनशून्यवादोनिरस्तोवेदितव्यस्तस्मिन्स्थितेतन्मृद्वेः॥०
नैकस्मिन्नसंभवात् इदानीमार्हतमतंपरीक्ष्यते० सप्तचैषांपदार्थाःशास्त्रसंग्रहभूताः जीवाजीवास्र
वसंवरनिर्जरबंधमोक्षाइति तेषामपरःप्रपंचः पंचास्तिकायोनामजीवास्तिकायःपुद्गलास्तिकायोध
र्मास्तिकायःअधर्मास्तिकायआकाशास्तिकायश्चेति० इमंचसप्तभंगीनयंनामन्यायंसर्वत्रावतार
यंति० स्यादस्तिस्यान्नास्तिचनास्तिचास्यादवक्तव्यःस्यादस्तिवावक्तव्यःस्यान्नास्तिवावक्तव्यःस्या
दस्तिचनास्तिचावक्तव्यश्चेति० तत्रजीवाजीवौप्रसिद्धौआस्रवयतिपुरुषंविषयेष्विंद्रियवृत्तिरास्रव
इत्युच्यते अन्येत्वार्हताआचक्षते० कर्तारमभिव्याप्यास्रवत्यनुगच्छतीति आस्रवंकर्मोच्यतइतिसंवरः
निर्जरस्तपः पूर्वसंचितंकल्मषंनिर्जरयतीति अश्नावमौनधारासननतिष्ठतिभोजनतप्तशिलारो
हणकेशोल्लुंचनादिलक्षणं अष्टविधोबन्धोदर्शनावरणीयं० ज्ञानावरणीयंमोहनीयमंतरायमि
तिचत्वार्येतानिघातिकर्माण्युच्यंते० वेदनीयंनामिकंगोत्रिकर्मायुष्कमितिचत्वार्यघातिकर्माणि
बंधनिर्मुक्तोनित्यसिद्धोर्हदनुग्रहान्मोक्षोभवतीति अस्तिकायइतिपरिमाणवोभिधीयते।धर्मा
स्तिकायःप्रवृत्त्यनुमेयः।अधर्मास्तिकायःस्थितिहेतुरक्तानां।आकाशास्तिकायोद्विधाभिद्यते०

लोकाकाशोलोकाकाशश्चेत्यत्र पर्युपरिस्थितानांलोकानामंतर्वर्तीलोकाकाशस्तेषामुपरिमोक्षस्थानमालो
काकाशश्चाकाशस्तेषामुपरिमोक्षस्थानमालोकाकाशस्तुपरतोपचलोकानसंति जीवास्तुत्रेधाभिद्यंते
बद्धात्मानोमुक्तात्मानोनित्यसिद्धाश्चेति० येमुक्तात्मानस्तेसर्वज्ञानिरतिशयसुखाश्चासतइति० तत्रेद
मुच्यते० नैकस्मिन्धर्मिण्यसंभवात्।कथमेकोभावोस्तिचनास्तिचस्यात्।यदास्तीत्यवधार्यते० तदा
नास्तीतिनावधार्यते० विरोधात् ननुघटरूपेणघटोनास्तिअनेनरूपेणास्तीतिकोविरोधः उच्यते
स्वरूपेतिसप्तभंगीनयस्याविशेषात्।स्वरूपमस्तीत्यपिस्यान्नास्तीत्यपितत्रानवस्थासातत्वमेवस्यात्
किंचयेसप्तपदार्थास्तेतथावानवाननुसर्वमनैकांतिकमित्यवधारणमप्यनैकांतिकमेवस्या
त्।अवधारणंस्यान्नास्तिचावधारणमितिनकश्चिन्निश्चयस्यान्मोक्षोस्तिनास्तीत्यवधारणप्र
वृत्तिरेवस्यात् तत्रैवंशास्त्रंप्रणयन्नुन्मत्ततत्पस्तीर्थकरःस्यात्।एवंचात्माकात्स्न्यंएवंबालेनापि
यदिष्टशरीरपरिमाणत्वंतदपिपक्षस्यासक्तेनात्मकात्स्न्यं अपरिपूर्णत्वंतत्रशरीरैकदेशेजीव
इत्येकदेशोजीवरहितःस्यात्० किंचमनुष्यशरीरपरिमाणोजीवःकेनचित्कर्मविपाकेनपि
पीलिकाशरीरंप्रविशन्नसमीयेत।नचपर्यायादप्यविरोधोविकारादिभ्यः मनुष्यशरीरपरिमा
णस्यजीवस्यहस्तिशरीरादावकात्स्न्यंपरिहर्तुंयच्छ्यंकथमनंतवयवआत्माहस्तिशरीरेतेषा

भ० द्वि०

मवयवानामुपचयोर्भकशरीरेऽपंचयदुत्पद्यंपर्णायादविरोध इति चेत्। न। विकारवत्त्वादिदोषप्र
संगात्। यदि सावयवो जीवः स्याद्देहवद्विनाशी स्यात्। न्यूनत्वाच्च न चोपचयापचयौ शक्यौ कल्पयितुं
प्रमाणाभावात्. ये पगमाप्तिपगता एव न तेषां पुनरात्मसंबंधानिरूपयितुं शक्यत इत्यसंगतमार्ह
तंमतं। अंत्यावस्थितेश्चोभयनित्यत्वादविशेषः। चरमदेहगतस्य परिमाणस्यावस्थितिरिष्यते
दिगंबरैर्भिन्ने देहे मुक्तः सर्वगतो देहांतरावच्छेदाभावात्. तन्नित्यं परिमाणं न तस्माद्यनयोर
प्यवस्थयानित्यत्वं स्यादतो विशेषः सर्वदा वाऽणुर्वा सर्वगतो वा न शरीरपरिमाणमनवस्थितमाश्र
यितुं शक्यमेवं चापचयोपचयपातज्ञा हानिरतो दिगंबरसिद्धांतोऽस्वंगत तथाप्यसंनमनादर
णीय इति यत्पुरसामंजस्यात्।। अधुना निमित्तकारणमीश्वरो निराक्रियते। तत्र माहेश्वरा श्च
त्वारः पाशुपताः शैवाः कापालिकाः कारुकसिद्धांतिनश्चेति. पशुपतिनेश्वरेण प्रणीतं पंचाध्या
यि शास्त्रं पंच च तत्र पदार्था व्याख्यायंते कारणं कार्यं योगो विधिर्दुःखांत इति कारणमीश्व
रः कार्यं शब्दप्रधानं महदादिवकार्य योगो प्रणवाद्यभिध्यानं क्वादिनिकुर्यात् धारणादिखेचरमुक्तो वि
धिः पदार्थस्त्रिषवणस्नानादिगूढचर्यावसानो दुःखान्तो मोक्ष इति; पाशुपतवैशेषिकनैयायिककापालि

कानामविशिष्टाः मुक्त्यवस्थायां पाषाणकल्पा आत्मानो भवंतीति मोक्षवैशेषिकयोश्चाविशिष्टा आत्मानश्चैतन्यस्व
भावास्तिष्ठंतीति नयेदमुच्यते पत्युरीश्वरस्य कल्पना अनुपपन्ना असामञ्जस्यात्। विभिन्नसामञ्जस्य वैषे
म्यनैर्घृण्यप्रसंगात् मध्यमोत्तमनीचं जगद्विम्वं प्रवर्तयतो ननु च प्राणिकर्मापेक्षत्वाददनवद्यं नेत्यन्योन्ये
न तत्र प्रमाणमस्ति नदपेक्षया करोति तं निरपेक्षो वा स्वातंत्र्य इति किंचिदत्र प्रमाणं क मते। अधिष्ठाना
नुपपत्तेश्च। ईश्वरस्य साक्षात्करणवच्चेन्न भोगादिभ्यः। यथा सेंद्रियग्राममधितिष्ठति तथेश्वर इति चे
न्नैतदेवं मुक्तमात्मनोऽधिष्ठानं। स्वविषयभोगार्थत्वात्. स्वकर्मार्जितधारांगादिमत्वाच्चेत्स्यादियह
णमीश्वरस्य तु सर्वं विपरीतं। अंतवत्त्वमसर्वज्ञता वा। नाशक्षो विकल्पार्थः। किं प्रधानपुरुषाणामिय
त्तानेन परिछिद्यते किं वा नेति. यदि परिछिद्यते तेषामंतवत्त्वं परिछिन्नं घटादिः तदंतवत्. दृष्टं अथ
न परिछिद्यते नन्वीश्वरस्यासर्वज्ञता अनुमानप्रधानस्यैतत् दूषणमागमवादिनं नु ब्रह्मोपादान
कारणं निमित्तं च सर्वशक्ति तदंगास्तु जीवा अनंता इति नानिरवद्यं उत्पत्त्यसंभवात्। इदानीं पंचरात्र
सिद्धांतः परास्यते ननु चेयमनुपपन्ना किं ता श्रुतिविरोधाभावात्. कथं वासुदेव एवोपादानकारणं
चेति ते मन्यते किं यायागम्यत आदनुपाय स्ततोपादेय्याते. अधिगमनोपादानेज्यास्वाध्याययो

मेजवंनंवासुदेवमाराध्यतमेधव प्रतिपद्यत इति तदेतत्सर्वं श्रुतिप्रसिद्धमेव तस्मान्नात्र निराकरणीयं पश्या
मो अभिधीयते यदत्र देवार्चनध्यानसमाधिलक्षणं कर्मज्ञानं चोपदिश्यते न तत्सर्वं प्रमाणीक्रियते। अर्था
न्तरं तु तं चान्तरे विरुद्धं किंचिल्लक्ष्यते नान्तरस्य तत्र वासुदेवः पराप्रकृतिः परमात्मा ततः संकर्षणो नाम
जीवो जायते संकर्षणात्प्रद्युम्नः सज्यमनो जायते ततोनिरुद्धो नमाहंकारो जायत इति भागवताम
न्यंते। तत्रेदमुच्यते। वासुदेवात्परमात्मनो जीवस्योत्पत्त्यसंभवात् कथमसंभवो नित्यत्वादिदोष
प्रसंगात् स्वर्गनरकापवर्गभागिनोभावाद्वेदप्रामाण्यं लुप्येत लोकव्यवहारश्च न सिध्यति। तस्मा
दनुपपन्नेयं कल्पना॥ न च कर्तुः करणं। इतश्चानुपपन्ना वार्तुः संकर्षणाद्वितीयात् कर्तुः करणं प्रद्युम्नसंज्ञंम
नो जायते। नहि देवदत्तात्परशुरुत्पद्यते विज्ञानादिभावे वा तदप्रतिषेधः। पराभिप्रायविकल्पायो वा शाङ्कः
सर्व एते आत्मानो भगवंते। वासुदेवादयश्च निरधिष्ठाना निरविद्याश्च विज्ञानैश्वर्यशक्तिबलवीर्यते
जोभिराद्यैर्गुणैरंतरन्विता इति। न चोत्तरं विज्ञानादिभावेपि तदप्रतिषेध उत्पत्त्यसंभवदोषस्याप्रति
षेधः स्यात् एवं सोदितः॥ ० विप्रतिषेधाच्च। प्रद्युम्नाख्यं मनो हंकारश्चानिरुद्ध इति करणत्वमहंकार
त्वं चाभिधाय सर्व एते आत्मन इति आत्मनं इति आत्मत्वमपि ज्ञानं विप्रतिषिद्धं। श्रुतिविप्रतिषेधश्च।

चतुर्षु श्रेयोद्वारमलब्ध्वेदं शास्त्रं शांडिल्य कारेति॥ ०॥ द्वितीयाध्यायस्य द्वितीयः पादः॥ न वियदश्रुतेः॥ पाद
विप्रतिषेधात्॥ परदर्शनानामुपेक्षा स्यात्तुल्यो वैदिकस्यापि दर्शनस्य अत्रापि श्रुतीनां विप्रतिषेधदर्शनादिति
तत्परिहारद्वारेण महाभूतानामिंद्रियाणां मुख्यप्राणस्य च जीवपरिकरवद्धानां समस्तभेदव्यवहारहेतुत्वनामधु
नासत्वं विचार्यते। वियदाकाशं नोत्पद्यते। कस्मात् अश्रवणात्। सदेव सोम्येदमग्र आसीदिति मुक्तस्य त्रया
णां तेजोबन्नानां स्वष्टिरुक्ता नाकाशस्येति। अस्ति तु। तुशब्दः पक्षांतरपरिग्रहे। अस्त्युत्पत्तिश्रुतिराकाशस्य
तैत्तिरीयके। तस्माद्वा एतस्मादात्मनः आकाशः संभूत इत्यत्र कश्चिदाह उत्पत्त्यनुक्तिश्रुत्योरेवं सति विरो
धः तत्र चावश्यमेकाश्रुतिर्गौणी कल्पनीयोभयोः प्रामाण्यतुल्यत्वादिति। गौण्यसंभवात्। अत्र पूर्वपक्षवादिवैशे
षिकं मतमनुसृत्याकाशोत्पत्तिवादिनी श्रुतिर्गौणीति प्रतिजानीते। कस्मादसंभवात्। समानजातीयैरनेकैर्द्र
व्यैः परमाणसंज्ञैरेकं द्रव्यमारभ्यते भूम्यादि न च निरवयवस्याकाशस्यानेकद्रव्यमारंभकमवयवभूतं संभवती
ति। शब्दाच्च। इतश्च वायुश्चांतरिक्षं चैतदमृतमिति॥ सामर्थ्यादजत्वं॥ स्याच्चैकस्य। ब्रह्मशब्दवत्। चशब्दः संभा
वनायां एकस्यापि संभूतशब्दस्याकाशे गौणत्वमुत्तरत्र मुख्यत्वं स्यात् यथा ब्रह्मशब्दस्य तपसा ब्रह्म विजिज्ञासस्व
तपो ब्रह्मेति तपसि गौणः परमात्मनि मुख्य इति प्राप्ते अभिधीयते॥ प्रतिज्ञाहानिरव्यतिरेकाच्छब्देभ्यः। येनाश्रुतं
श्रुतं भवत्यमतं मतमविज्ञातं विज्ञातमित्यस्याः प्रतिज्ञाया एवमहानिरपरित्यागः स्याद् व्यतिरेकादाकाशस्याविज्ञे

येन ब्रह्मणा शब्देभ्यश्च समस्तस्य वस्तुनो व्यतिरेकः ॥ सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयमेतदात्म्यमिदं सर्वमित्यंतप्रपा
ठकपरिसमाप्तेः ॥ यावद्विकारं तु विभागो लोकवत् ॥ उत्पत्त्यसंभवशंकानिवृत्त्यर्थस्तुशब्दः संभूतश्रुतेरेव चनचसक्कुद्गुचा
णगौणत्वमुख्यत्वसंभवो दृष्टान्तेन्तु कारणभेदादुपपद्यते । न च निरवयवस्योत्पत्तिर्न संभवति । बुद्धिकर्मवदुपपत्तेः प्र
त्यनुमानं च क्रियते यावद् । किंचिद्विकारजातं दृश्यते । घटशरावादि तावद्विभागवल्लोके लक्ष्यते विभागः पृथक्त्वं तदने
नानुमानमुपन्यस्तं आकाशं कार्यं भवेत् नत्वे सति विभक्तत्वात् । पृथिव्यादिवदिति सविशेषणो हेतुरुपादीयते । अ
न्यथा आत्मनोपि कार्यत्वं प्रसज्येत । एतेन मातरिश्वा व्याख्यातः ॥ एतेन वियदुत्पत्तिन्यायेन मातरिश्वा वायुर्व्याख्यातो
वेदितव्यः सैषा अस्तनमिता देवता पृथ्वापारातिस्यान्नित्यत्वबुद्धिः कस्यचित्तन्निवृत्त्यर्थमतिदेशसूत्रमादित्याम्नाना
मस्तमयापेक्षया वायोर्विशेषकथनमेतदनस्तमितेति । असंभवस्तु सतोऽनुपपत्तेः । शब्दस्पर्शादीनां गुणानां उपाधी
नां दिक्कालसंख्यापरिमाणादीनां चोत्पत्त्यप्रवणात् नित्यत्वमिति प्राप्त उच्यते । असंभवस्तु नित्यत्वाशंकानिवृत्त्यर्थस्तुश
ब्दः सतो विद्यमानस्य गुणस्य धन्यस्य वा नित्यत्वासंभवः कस्माद्द्वितीयश्रुत्यनुपपत्तेः न च गुणादीनां पृथगुत्पत्ति
र्वक्तव्या द्रव्योत्पत्तितो वोत्पत्तिसिद्धेस्तदनन्यत्वाध्यायपत्तो जानडतियवगुरणानामपि जन्मे क्रमभवति कालेप्यादित्या
दीनां गतिविशेषास्तमयोदयलक्षितो भागो दिगुच्यते । ये पुनः सतो ब्रह्मणः उत्पत्तिमाशंक्य तन्निराकरणार्थं
सूत्रं वर्णयंति तेषां निरर्थकं सूत्रमाशंकाहेत्वभावात् कारणं करणाधिपाधियो न चास्य कश्चिज्जनिता न चाधि
पइतिमंत्रवर्णान्नहि वचनमदृष्टा पूर्वपक्षः क्रियते अनवस्थानात् । तेजोतस्तथाह्याह । तेजोतो मातरि ना.

श्वनो जायते कुतस्तथाकाशान्मातरिश्वा तथा वायोरग्निरिति ननु तत्तेजोऽसृजतेति सतो जन्म श्रूयते न वायोर्नो यवि
रोधस्तेन तेन विकारात्मनावस्थिताब्रह्मैव सृजतीति तदनन्यत्वाद्विकाराणां । आपः । अतस्तथा ह्याहेत्यनुवर्त्तते अतस्ते
जसः आपो जायंते अग्नेरापइति तरिता अपोमाभूरंनिति सूत्रप्रणयं । नात्र मन्दविषयोन्यायोस्ति किंति ॥ पृथिव्य
धिकाररूपशब्दांतरेभ्यः । ता अन्नमसृजंतेत्यन्नार्थं व्रीहियवादिस्यात् वाक्यशेषात् न तस्माद्यत्र क्व च वर्षति तदेव भू
यिष्ठमन्नं भवतीति प्राप्त उच्यते । पृथिव्येवान्नशब्दवाच्या कस्मादधिकाराद् महाभूतसृष्ट्यधिकारात् तथारूपात्
कृष्णस्तत्पृथिव्या इति । तथा शब्दान्तरात् अद्भ्यः पृथिव्यादिभ्यः पृथिवीति तद्यदपां शर आसीत्तत्समहन्यत सा पृथिव्यभव
दिति च कार्यापत्यास वाक्यशेषः दृश्यविरोधः । तदभिध्यानादेव तु तल्लिंगात्सः । वियदादीनां तत्त्वानां स्वकार्यो
त्पादकत्वमुख्यार्थत्वादिति प्राप्तेऽभिधीयते । स एव परमेश्वरः तेन तेनाकाशादिरूपेणावस्थितत्वात्तं तं विकारं सृजती
त्यवगंतव्यं कस्मात् तल्लिंगात् तस्य लिंगं ज्ञापकं शास्त्रं यः पृथिव्यां तिष्ठन्निति बहुस्यां प्रजायेयेति तदात्मानं स्व
यमकुरुतेति च तदभिध्यानात्तस्येश्वरस्याभिधानात् संकल्पादेव तत्तेज ऐक्षत ता आप ऐक्षन्तेति च उपपद्यते
न तेषामात्मानं चेष्टास्त्यभिप्रायः । विपर्ययेण तु क्रमोऽत उपपद्यते च । भूतानामुत्पत्तिक्रमोऽवगतः प्रलयक्रमो
निरूप्यते नियमानियमकारिणः माश्रङ्कु नापोमलमान्विछेतिश्रुतेः स्मृतिः जगत्प्रतिष्ठा देवर्षे पृथि
व्यप्सु प्रलीयते ज्योतिष्यापः प्रलीयन्ते ज्योतिर्वायौ प्रलीयत इत्युपपद्यते चैवं नहि तं तु शावस्थे घटस्य
कार्यावस्थितिरिति राक्ति । अंतरा विज्ञानमनसी क्रमेण तल्लिंगादिति चेन्नाविशेषात् । सृष्ट्यप्ययक्रमो भूताना

मद्वैतभावनोपयोगिनो निरूपिताभिधानानींद्रियमनोबुद्धीनां क्रमोऽभूत् तत्क्रमाविरोधेन प्रतिपाद्यते ब्रह्मणो भूता
नां चांतराले विज्ञानमनसी स्यातां विज्ञानशब्देनेंद्रियं गृह्यते बुद्धिश्च तदुभयं मनश्च विज्ञानमनसी तल्लिंगादेत
स्माज्जायते प्राणो मनः सर्वेंद्रियाणि बुद्धिं तु सारथिं विद्धीति चेन्न कस्मादविशेषात् पुरस्तात्तस्मात्तदोत्पत्तिरंता
नामहापोक्षिता चेंद्रियाणां क्रमाविरोधात् परस्तादेवोत्पत्तिर्युक्ता दर्शयति च सप्राणमसृजत प्राणाच्छ्रद्धां खं
वायुर्ज्योतिरापः प्राणस्तेजोमयी वागिति शरीरप्रदेशरूपादिग्रहणशक्तियुक्तं। बाह्यमिंद्रियमध्यवसायात्मि
का बुद्धिः संकल्पस्मृतिचिंतादिवृत्तिहेतुर्मन इति विवेकः। चराचरव्यपाश्रयस्तु स्यात्तद्व्यपदेशो भाक्तस्त
द्भावभावित्वात्॥ जातो देवदत्तो मृत इति व्यपदेशादनित्यत्वं जीवस्येत्याशंकां तु शब्देनापनीयते। प्रायमु
त्पत्तिप्रलयव्यपदेशो लौकिकः सभाक्तः गौण इत्यर्थो यया गौण्या वृत्त्या मुख्या वृत्तिरास्थीयते भज्यते सा
भक्तिः तत्र भवो भाक्तः चराचरव्यपाश्रयः चरं जंगमशरीरमचरं तु इति इति गौणत्वसिद्धिः कुतः तद्भा
वे शरीरभावे जन्ममरणयोर्भावित्वात् तथा च श्रुतिरयं पुरुषो जायमानः शरीरमभिसंपद्यमानः सन् उ
त्क्रमन् म्रियमाण इति। नात्मा श्रुतेर्नित्यत्वाच्च ताभ्यः वियदादिवदात्मा जायते नेति चिंता। तत्र प
याग्नेः क्षुद्रा विस्फुलिंगा व्युच्चरंतीत्युपक्रम्य एवमेवास्मादात्मनः सर्व एव आत्मनो व्युच्चरंतीत्यतो जीवो जायत इति
प्राप्ते ब्रूमः नात्मा जायते कस्मादश्रुतेः। न ह्याकाशादिसृष्टिप्रकरणे जीवस्योत्पत्तिः श्रुतास्ति। नित्य

नारा.

त्वाच्चोत्पत्तिर्विरुध्यते कथं नित्यत्वं प्रतिभिज्ञानादहमिदमदर्शमिति सर्वो लोकः स्वमात्मानं वेदयते। अंधका
रे स्थापितं वस्तु संस्पृश्योपादत्ते स्वसंवेद्यो हि सन् परस्मै घटादिवद्दर्शयितुं शक्यः। ताभ्यश्च श्रुतिभ्यो। नि
त्यत्वं जीवापेतं वेदं म्रियते न जीवो म्रियते। अजो नित्यः शाश्वतोऽयं पुराणो अविनाशी वा अरेऽयमा
त्मानुच्छित्तिधर्मेति। भूयसीनां च श्रुतीनामन्यथाकर्तुमशक्यत्वात्तदविरोधाय विस्फुलिंगश्रुतावि
परिणामेन चापि विकारभावो विवक्षितः किंतु उपाधिकृतभेदाभिप्राया हि सा। नेहाग्निसामान्या
नुगमात् पार्थिवद्रव्यविश्लेषवशाद्विच्छेदमात्रं नाप्यंतभेदः सुषुप्तिकरणत्वान्न स्वरूपाभिप्रायेणोलिदि
नं॥ ज्ञोऽत एव॥ जीवस्यास्वतश्चैतन्येनागंतुकमेव तस्य चैतन्यं। यदिदं घटादिविषयं विज्ञानमविज्ञा
नविच्छेदेन वर्तते तदेवास्य चैतन्यमिति काणादा मन्यंते तत्रेदमुच्यते जीवो ज्ञः कस्मादत एव श्रु
तिभ्य एव चायं पुरुषः स्वयंज्योतिर्न हि विज्ञातुर्विज्ञातेर्विपरिलोपो विद्यते विज्ञानघन एवैतेभ्यो भूतेभ्य
इति ब्रह्मांशत्वाच्च विस्फुलिंगन्यायेन विज्ञानमानंदं ब्रह्म सत्यं ज्ञानमनंतं ब्रह्मेति स्वाभाविकं चा
स्य ब्रह्मस्वरूपमौपाधिकमितरत् किंच। स्वप्रत्यक्षं चास्य चैतन्यं ज्ञातृस्वरूपस्य सर्वदापरोक्षत्वा
त्। घटादिज्ञानानां च कदाचित्कानां पर्यायेणावगम्यमानत्वाद्यथाज्ञेयं यावं तथा विज्ञानसंतानो

भ. द्वि०

पिग्राह्य एवात्मन इति स्थितं ॥ उत्क्रांतिगत्यागतीनां ॥ इदमिदानीं शंक्यते। किमणुपरिमाणः किं वा म
हापरिमाण इति. किं नावस्थाप्रमणपरिमाण इति ॥ कस्मादुत्क्रांतिगत्यागतीनां श्रवणादि सध्यास्त्त
उत्क्रामतं प्राणोनूत्क्रामति ये के चास्माल्लोकात् प्रयंति. चंद्रमसमेव ते गच्छंती तिया वत्संपातमु
षित्वाथैतमेवाध्वानं पुनर्निवर्तंत इति न चासर्वगतस्य न चमुपपद्यते। स्वात्मना चोत्तरयोः ॥ ग्रा
मस्वाम्यनिवृत्तिवदुत्क्रांतिः कदाचित्स्यादुत्तरयोस्तु गत्यागत्योः स्वात्मना स्वरूपेणैव संभवा
दिति विशेषाभिधानं. नाणुरतत् परमात्माधिकारात् ॥ नाणुरणुर्जीवः स्यादतत्श्रुतेर्महत्वश्रु
तेः स वा एष महानज आत्मेति चेन्न इतराधिकारात् परमात्माधिकारात् स्वरूपाविवक्षया
सोनिर्देशोन जीवपर इत्यर्थः। स्वशब्दोन्मानाभ्यां च। इतश्च स्वशब्दादुन्मानाच्चैषोणुरात्मा
चेतसा वेदितव्यः। उद्धृत्यमानमुन्मानं वालाग्रशतभागस्य शतधा कल्पितस्य च भागो जीव
स विज्ञेयः स चानंत्याय कल्पत इत्याराग्रमात्रो ह्यवरोपि दृष्ट इति ॥०॥ अविरोधश्चंदनवत्
कथमणोः सकलशरीरव्यापिनी संवित्तिरिति चेन्न अयं विरोधो यथा हरिचंदनबिंदुः शरी

रैकदेशनिपतितः कृत्स्नं शरीरमाह्लादयति तथेति अवस्थितिवैशेष्यादिति चेन्नाभ्युपगमाद्धृद्
हि हरिचंदनस्य युक्तं त्वगिंद्रियसंबंधात् कृत्स्नदेहव्यापित्वमवस्थितिवैशेष्याच्छरीरैकदेशावस्थि
तस्य प्रत्यक्षादिति चेत् नैतदेवं आत्मनोप्यवस्थितिदेशविशेषाभ्युपगमात्. तथा ह्याह श्रुति
र्हृदि ह्येष आत्मा स वा एष आत्मा हृदीति हृदयवर्तमानत्वं चासंबंधः सा च सकलशरीरव्यापिनी
यां वेदनेति दर्शनाद्वोच्यते. मूर्तस्य मूर्तांतरेणायं संयोगो नेंद्रियेणाविद्यमाने नापि कर
णकस्याभोक्तृत्वात्. कर्मकृतोयेन संबंधो भोक्तृभोग्ययोगो नेंद्रियेण रूपलब्धिका यां नु मु
यः पारमितत्वात् तु कारणकस्य न देशसमुत्थायां वेदना जीवस्योपजायत इत्यनवद्यं। गुणा
द्वालोकवत्। वेतिविवेकत्वे। चैतन्यगुणव्याप्तिरालोकवत् यथा प्रदीपव्याप्तेः सकलगृ
हकार्योपपत्तिः। व्यतिरेको गंधवत्। कथं पुनर्गुणिदेशव्यतिरेको गुणस्येति। कणादाम
न्यते. अत्रोच्यते। यथा गंधः केवलो गृह्यते न तदाधारस्य द्रव्यस्य नासिकादेशागमनं
कल्प्यते. यदि द्रव्यावयवं तत्रागच्छेत् कालेन द्रव्यस्यापचयः स्यात्। तच्चाच दर्शापाति

भ॰ द्वि॰

इतश्चाव्यतिरेको यथा स्नाभिन्योपउक्तस्तथा गुणेन व्याप्तिं दर्शयति स एष इह प्रविष्ट आलोमभ्य आ
नखेभ्य इति। पृथगुपदेशात्। विज्ञानेन विज्ञानमादायेति जीवाद्विज्ञानस्य पृथगुपदेशात् गुणेन व्या
प्तिरणुत्वे इति पक्षांतरं गुणाद्वेति परमतमभिप्रायं सूत्रं न हि गुणिनं विहाय गुणस्य स्वातंत्र्यं गु
णत्वमेव हीयेत. न हि शुक्लादयो भिन्नदेशा दृष्टाः द्रव्यस्यापि काले न क्षयो दृष्टः। विज्ञानेनेति
चांतःकरणाभिप्रायाशंकापरिहारोक्तं आलोमभ्य इति चेद्द्वारेणोपपद्यते। तद्गुणसारत्वात्तु
तद्व्यपदेशः प्राज्ञवत्। नैतत् संसारावस्थायामणुत्वमिति ननु न देहास्य निजं रूपं तत्व
मसीति श्रुत्या स्वोपदेशात्। स्वाभाविकं। अणुत्वव्यपदेशः कथमित्यत आह तद्गुणसारत्वादिति बु
द्धिरंतःकरणं मनः विज्ञानमसि इति नित्यत्वं परामृश्यते. तस्या गुणा रागादयो हं प्रत्ययाश्रयाः
सारशब्दः प्रधानवचनः तद्गुणाः सारप्रधानं सरणे यस्य जीवस्य स तद्गुणसारो बुद्ध्यादि
भिः सूक्ष्मावस्थे इंद्रियैश्च तदाश्रितैः पंचवृत्तिना च वायुना परिवेष्टितः स्वभावाद्विधा
यी संसरतीत्यर्थः। तदा चाहुः पौराणिकाः पुर्यष्टको लिंगं प्राणाद्येन स युज्यते। तेन बद्ध

स्यैवं बंधो मोक्षो मुक्तस्य तेन चेति तदिदमौपाधिकमणुत्वं जीवस्यातो इष्टव्यं। मनसोणुत्वादात्मनोणुत्वं नियतमुच्यते
लिंगं पुनः संकोचविकासि सूक्ष्मस्थूलशरीरापेक्षया शङ्खवध्याणीन्व्रीहेर्वा यवाद्वेति हृदयायतनापेक्षयाणीयस्त्वं
ज्यायदित्याशंक्याह नायं दोषो यावदात्मभावित्वाद्बुद्ध्युपाधियोगस्येति यावदयमात्मा केवलेन द्वैतदर्शनेन संसरति ता
वत्कालभावी बुद्ध्याद्युपाधियोगः कथं गम्यते तस्य दर्शनाद्योयं विज्ञानमयः प्राणेषु हृद्यन्तर्ज्योतिः पुरुषः स समानः
सन्नुभौ लोकावनुसंचरति तथा विज्ञानमयो मनोमयः प्राणमयः चक्षुर्मयः श्रोत्रमय इति सुषुप्तिप्रलययोः कथमुपा
धियोगः शंकाजेवक्कमित्युत्तरं पठति। पुंस्त्वादिवत्त्वस्य सतोभिव्यक्तियोगात्। तुशब्दोवधारणे। सत एवास्य बु
द्धिसंबंधस्य प्रबोधकाले चाभिव्यक्तिस्तस्याभिव्यक्तिर्यौवने। नित्योपलब्ध्यनुपलब्धिप्रसंगोन्यतरनियमो वा
न्यथा। तच्चोपाधिभूतमंतःकरणं सर्ववादिभिरभ्युपगंतव्यमन्यथा ह्यात्मेंद्रियविषयाणां सन्निधौ नित्योपल
ब्धिः स्यान्नित्यं वानुपलब्धिप्रसंगः। अन्यतरनियमो वान्यथान्यतरस्येंद्रियस्यात्मनो वा नियमः शक्तिप्रव
क्ता कल्पनीया कदाचिदुपलब्धिहेतुत्वं कदाचिन्नेति सा चाशक्या स्वभावविपर्ययहेतुभावादतो मनोभ्यु
पगंतव्यं श्रुतिश्चान्यत्रमना अभूवं नादर्शमन्यत्रमना अभूवं नाश्रौषमिति। उक्तं च नैयायिकैर्युगपज्ज्ञाना
नुत्पत्तिर्मनसो लिंगमिति। बौद्धानां मनोवस्थितं नास्तीति तन्निराकरणार्थं सूत्रं यत्तु नरात्माधिभुत्व

श्री

भ॰ द्वि॰ वादिनां दोषकथनार्थं सूत्रमिति व्याख्यानं न ह्युक्तं सर्वगत्वे विशरीरदेशभोगोस्य केः कर्मानिमित्तत्वात्तस्य। कर्ताशास्त्रा
र्थवत्वात्। भोक्तैवात्मा न कर्ता बुद्धिः कर्त्रीति सांख्यमतं तन्निराकरोति। कर्ता आत्मा शास्त्रार्थवत्वात् यजेत जुहुयादित्यादि
॥ विहारोपदेशात्। विहारः संचरणं। स ईयतेऽमृतो यत्र कामः स्वे शरीरे यथाकामं परिवर्तत इति। उपाद
नात्। तदेषां प्राणानां विज्ञानेन विज्ञानमादाय इति प्राणानामिंद्रियाणां विज्ञानेन बुद्ध्यादितानं ग्राहकसामर्थ्य
मादायेति। व्यपदेशाच्च क्रियायां न चेन्निर्देशविपर्ययः॥ क्रियायां यज्ञादिकायां कर्तृव्यपदेशाद्विज्ञानं यज्ञं तनुत इति
जीवो न बुद्धिरुच्यते न चेज्जीवो निर्देशविपर्ययो भवेत्। करणत्वाद्बुद्धेस्तृतीयाविभक्तिः स्याद्विज्ञानेनेति। ननु स्वतंत्रः
कर्ता स्वानिष्टमेव कुर्यादत आह। उपलब्धिवदनियमः। यथेष्टोपलब्धिः तथा क्रियायामनियमः॥ शक्तिविपर्ययात्
यदुक्तं बुद्धिः कर्तेति इदमयुक्तं शक्तिविपर्ययात् कर्तृशक्तिः स्यात् करणशक्तिश्च निवर्तेत। यः कर्ता स जीवो
थ॰ न्यत् करणमिति स्थानं समाध्यभावाच्च॥ निदिध्यासितव्य इति मनसः प्रवृत्तिनिरोधेनात्मरूपाभिमुखीभूतस्य
सातत्येन यद्ध्यानं समाधिः। तस्मादावश्यकः कर्तृभावात्। यथा च तक्षोभयथा ननु कर्तृत्वं स्वाभाविकमौ
पाधिकं चेति चिंत्यते। पूर्वोक्तैर्हेतुभिः स्वाभाविकमिति प्राप्त उच्यते। न स्वाभाविकं कर्तृत्वमनिर्मोक्षप्रसंगात्। क श्री॰
र्तृत्वे सति सन्निमित्तं कर्म ततः सुखदुःखोपभोगः स्यात्। सुषुप्तावस्थायां व्यभिचारान्न च चैतन्यमूर्त्ते

१२

रात्मनः स्वभावांतरसंभवति न चोपाधिकं कर्तृत्वमपारमार्थिकं यथाग्निगतेनोष्णगुणेन दाहो नुभूयते। किमसावपा
रमार्थिको भवेदिति। यद्यपि स्वात्मन्यात्मत्वेनास्य वस्तुपाधिवशात् कर्तृत्वमुपजायते यथा च तक्षा वास्यादिकरण
युक्तः कर्ता तद्विमुक्तश्चाकर्ता॥ परात्तु तच्छ्रुतेः॥ न दोपाधिकं कर्तृत्वं किं स्वतंत्रं तस्य जीवस्याथ परायत्तमिति चिं
तायां स्वतंत्रस्येति प्राप्तं नाह लोके कृष्यादिषु वर्तमानः परमपेक्षते। रागादिप्रेरितो हि प्रवर्तत इति प्राप्ते ब्रूम
परादीश्वरात्। तच्छ्रवणादेष ह्येव साधु कर्म कारयति। य आत्मनि तिष्ठन्नात्मनोऽन्तरो यमयतीति च वाक्य
दिन। ईश्वरनियंतृत्वे नैर्घृण्यं तस्यादित्याह। कृतप्रयत्नापेक्षस्तु विहितप्रतिषिद्धावैयर्थ्यादिभ्यः॥ नै
र्घृण्यादिदोषानिष्टप्रसंगुरुद्धो जीवकृतो यः प्रयत्नः शरीरेंद्रियमनसामात्माधिष्ठितानां पाकादिविधानार्थो
श्रितश्रेष्ठाविशेषभावना। अपूर्वं धर्मो विधिरिति शास्त्रे व्यपदिश्यते। स एव च लोके वेदयोर्वाक्या
र्थो नियोगस्तु तत्स्थो निमित्तमात्रं प्रेरणाध्येषणादिवत्। तदपेक्ष्य ईश्वरः स्वतन्त्र एव स्वव्यापारं कुर्वतो
जीवस्य पर्जन्यवत् साधारणं कारणं। एवं विहितप्रतिषेधयोः यजेत न हन्तव्य इत्यादिवैयर्थ्यं स्यात् अन्य
था वेदशास्त्रारंभस्त्वनिवारित्वादिग्रहणमिति स्वतंत्रस्यैव जीवस्य कर्तृत्वमित्यारंभ ईश्वरापेक्षंक

भ.टि. त्त्वमितिस्थापितं वैषम्यनैर्घृण्येरायत्त्यनुकर्मापेक्षया जगत्सर्ग इति विवेकः।अंशो नानाव्यपदेशात्। अन्यथा
चापिदाशकितवादित्वमधीयत एके। पराधीनं यस्य कर्तृत्वं निरूपितं किमसौ ततोत्यंतं भिन्नः। किं वा अ
त्यंतमभिन्नं इति विचार्यते। अंशत्वे युक्तातेनाविभागप्राप्तिरितरत्र भेदे नावस्थानमिति चिंतायाः प्रयो
जनं। किं तावत्प्राप्तं स्वामिनृत्यन्यायेन भेद इति प्राप्ते ब्रूमः। तदंशो जीवोस्त्वंशशब्दः कारणवाचीयथा
घटस्यांशोवयवस्तंतुरित्यस्ति चैक्याविभागवचनो यथापादिवत्। इत्यंशिनोवयासि हेति तयोरिह
ग्रहणं न भवति किं तर्हि पाध्यवच्छिन्नस्यानन्यापन्नत्स्य वाचकोयमंशशब्दः प्रयुक्तो यथाग्नेर्विस्फुलिंग
स्य। कथं पुनर्निरवयवस्य परमात्मनोंशः संभवति आगमान्नावदवगम्यते· यथाग्नेः क्षुद्राविस्फुलिं
गा इति· दृष्टांत इति प्रणयनात्। यथा चाकाशस्य पार्थिवाधिष्ठानावच्छिद्रं कर्णच्छिद्रं यथा च वायोः
पंचवृत्तिः प्राणः यथा च मनसः कामादयो वृत्तयः स चाभिन्नाभिन्न स्वरूपो अभिन्नरूपं स्वाभाविकं
मोपाधिकं तु भिन्नरूपं उपाधीनां बलवत्वात् तत्त्वं प्रच्छिनत्त्यतमभाः संसरत्यतीत्वद्वेष्टोप्युपग
म्यते· नानाव्यपदेशात् सोन्वेष्टव्यः स विजिज्ञासितव्य इति तत्र तत्र जीवपरयोर्भेदव्यपदेशा

दाथर्वणिकाश्च ब्रह्मत्वेव हेमेदाशा ब्रह्मेमे कितवा इत्यधीयते दासाः कैवर्ताः नाहिनजस्यापि ब्रह्मत्वं वन्
सर्वस्याभेदं दर्शयति· तथा श्वेताश्वतराणां मंत्रः त्वं स्त्री त्वं पुमानसि त्वं कुमार उत वा कुमारी त्वं जीर्णो
दंडेन वंचसि त्वं जातो भवसि विश्वतोमुख इति मंत्रवर्णात् आदौ स्य विश्वा भूतानीति। अपिस्मर्यते ममै
वांशो जीवलोक इति· ननु चांशगतेन दुःखेन परस्यां दुःखवत्वं यथा नयनगते न दुःखेन चैत्रस्य त्याशं
क्याह। प्रकाशादिवन्नैवं परः यथा सौरश्चान्द्रमसो वाङ्गुल्यादिषु ऋजुकुब्जकेषु तत्संबद्धोपि तद्धर्मैर्भ
ज्यते न तद्वत्। यदुक्तं चैत्रवदिति तदयुक्तं स्वप्ने चाद्दिंशोतनस्य दुःखवेदनायस्य त्वात्मनो दुःखवेदनान तस्य नेत्र
मंश इति विषमदृष्टांतः॥ स्मरंति च। व्यासादय इति शेषः। तत्र यः परमात्मा सं नित्यो निर्गुणः स्मृतः। न लिप्यते फ
लैश्चापि पद्मपत्रमिवांभसा। कर्मात्मा त्वपरो योसौ मोक्षबंधैः सयुज्यते स सप्तदशकेनापि राशिना युज्यते
पुनरिति। अनुज्ञापरिहारौ देहसंबंधात् ज्योतिरादिवत्। परमात्मनो विदभिन्नो जीवः कस्यानुज्ञापरिहारौ
स्यातां नहि परमात्मनो धिकारोस्ति नित्यशुद्धबुद्धयुक्तरूपत्वात्। अत्रोच्यते। स्यातामनुज्ञापरि
हारावंशस्य देहसम्बन्धात् तमधिकृत्यानुज्ञान वनस्य तारूपेयादिति परिहारः परस्यार्थानं गच्छेद

भ. टि०

त्ययथाग्नि: कृत्स्नापरित्यज्य प्रेतकृतवहस्तत्याद्दीयते. तद्वदेकत्वेप्युपाधिवशाल्लौकिकवैदिकव्यवहारव्यपातीशति
ननु चैकात्म्यवादे सर्वकर्मसंकरप्रसंग: एकेनाश्वमेधे कृते सर्वै: कृतं स्यात्। एकेन सुरापाणे कृते सर्वै: कृत
मिति नेत्युच्यते कथं। असंततेश्चाव्यतिकर: अस्मत्पक्षे नास्ति व्यतिकर:। कस्मादसंततेरणुपरिमाणो जी
व इत्युक्तं। स चासंततो न सर्वशरीरव्यापी स्वे स्वे शरीरे वर्तमानो यदा कर्ता भोक्ता च तदा कुत: संकर: देहानां
च परिमितत्वाद्व्यवहारावस्थायां मुक्तस्य तु न व्यवहारो निरुपाधिरिति नास्ति संकराशंका:॥४९॥ आभास एव
वायेषां बहव आत्मान: सर्वगताश्च तेषामेव व्यतिकर इति दर्शयिष्यन् सामान्यरूपमाह। आध्यात्मिक
घ आभास एव वेदवाक्यादर्शनेपि दाहकृत्। सर्वेषामात्मनां सर्वशरीरसंतते: सर्वव्यवहारव्यतिकर: प्राप्नोति
व्यपरेत्याभास एव चेत्येकवचनान्तं सूत्रं पठित्वाऽनमर्थं वर्णयंति परमात्माभासो जीव: प्रतिबिम्बा
भासं साप्यविद्यापरिकल्पित:। तस्यापरिमितत्वादसंततेरव्यतिकर इति तदयुक्तं आभासस्यावस्तु
त्वाभ्युपगमादवस्तुन: शशविषाणकल्पस्याचेतनस्य कुतो बंधो मोक्षो वा कर्माधिकारो वा. न च श्री:
परमात्मन: संसारित्वमस्तीत्युक्तं पुरस्तादतो नार्थ: पाठ इति। अदृष्टानियमात्। अथमनुषे दृष्टंनियाम
कमिति तं न तनियमात् सर्वात्मनां सन्निधावुपलभ्यमानमदृष्टं साधारणं भवितुमर्हति. विशेषहेत्वभावात्. न वा
न्यभिसंधिवेशाद्व्यवस्थायत्वात्संकल्प: तस्मादर्शं भवतीत्याह। अभिसंध्यादिष्वपि चैवं। तद्वद्वदनियम एव आ
दिग्रहणं श्रद्धादिपरिग्रहार्थं कथमेकस्मिन्मनसि सर्वात्मनां संभवेतत्रासंकल्प इच्छादय: साधारणा एव
नेनिवृत्तमदृष्टसाधारणमेव तत्कारितं च शरीरं सर्वार्थमित्यनादित्वेप्यसाधारण्ये हेतुर्न शक्यतेऽवग
तुं। प्रदेशादिति चेन्नान्तर्भावात्। शरीरावच्छिन्नो य आत्मप्रदेशस्तत्रादृष्टं समवैति एवं प्रतिशरीरं व्यव
स्थितिरिति चेन्नान्तर्भावात्। सर्वेषामात्मनां योयं शरीरावच्छिन्नो देशस्तत्रापि सर्वे सन्निधिसर्वगतत्वादन्यथा
सर्वगतत्वप्रसंगान्निरवयवस्य चात्मन: प्रदेशकल्पनानुपपन्ना कल्पितस्य प्रदेशस्यावस्तुत्वादनि
यामकत्वमिति॥७॥ द्वितीयाध्यायस्य तृतीय: पाद:॥ ॥ तथा प्राणा:॥ असद्वा इदमग्र आसीत्त
दाहु: किं तदसदासीदिति ऋषयो वाव तेऽग्रेऽसदासीत्तदाहु: के ते ऋषय इति प्राणा वा ऋषय: ते यत्पुरा
स्मात्सर्वस्मादिदमिच्छन्त: श्रमेण तपसा ऋषंस्तस्मादृषय: स योऽयं मध्ये प्राण एष एवेन्द्र इत्य
ग्निप्रकरणे वाजिनां श्रुते: प्राणस्योत्पत्तिश्रवणान्नित्या इति पूर्वपक्षवादी मन्यते. नन्वेतस्माज्जा

भ॰द्वि॰ यतेप्राणोमनः सर्वेंद्रियाणि चेतिप्राणानामुत्पत्तिवादिनिश्रुतिर्दृश्यते॰ सत्यंसातुगौणीतिप्राप्तउच्यते॰ यथा
वियदादयउत्पद्यंतेब्रह्मणस्तथाप्राणाइंद्रियाणीत्यर्थः। सप्तप्राणाः प्रभवंतितस्मात्सप्राणमसृजतप्राण
श्रद्धांखंवायुर्ज्योतिरापः पृथिवींद्रियंमनोन्नमिति॰ यथाग्नेः क्षुद्राविस्फुलिंगाव्युच्चरंत्येवमेवास्मादात्मनः
सर्वेप्राणाइत्युत्पत्तिश्रुतीनांभूयस्त्वादिप्रातिनिधिसमर्थनायभूयसांस्यात्सधर्मत्वमितिचन्यायात्।
यदुक्तमुत्पत्तिश्रुतिगौणीतितदुच्यते। गौण्यसंभवात्। नैतदेवं। गौण्याः श्रुतेरसंभवोगौण्यसंभवस्तस्मात्
विग्रहः। कथमसंभवः श्रुतिभूयस्त्वादिरुक्तं। प्रतिज्ञाविरोधाच्च। कस्मिन्नुभगवोविज्ञातेसर्वमिदं
विज्ञातंभवतीतिप्रतिज्ञायतत्सिद्ध्यर्थमेतस्माज्जायतेप्राणः इत्युक्तोपसंहरतिपुरुषएवेदंविश्वंक
र्मतपोब्रह्मपरामृतमितिब्रह्मैवेदंविश्वमिदंवरिष्ठमित्यात्मनो — यदर्शनेनश्रवणेनमत्याविज्ञा
नेनेदंसर्वंविदितंभुतंमतमादेशमप्राक्ष्योयेनाश्रुतंश्रुतंभवतिप्रतिवेदांतेसर्वविज्ञानप्रतिज्ञानमुप
संहर्तव्यमुत्पत्तिश्रुतीनांमुख्यार्थसंभवेपेक्षितार्थत्वेनान्यथाकल्पनमयुक्तंतत्सरलात्समस्तस्य श्रीः
हिप्रपंचस्यतद्विकारत्वात्तदनन्यत्वेनवाद्वितीयात्मविधानादपवर्गइतिविवक्षितोर्थः सर्वंचया

पुनरग्निप्रकरणश्रुतिः सामुख्यार्थोत्र कथमवांतरप्रलयेप्यग्निसाधनानांशर्करादीनांसृष्टिर्व
क्तव्येतितदर्थोसाउपक्रमस्तत्राधिकारपुरुषः प्रजापतिरविनष्टएवत्रैलोक्यमात्रंप्रलीनमतस्त
दीयप्राणानालोच्यसाश्रुतिः प्रवृत्तेत्यनुरोधः एवंसर्वश्रुतीनांपदार्थाः ॥० तत्प्राक्श्रुतेश्च॥ तस्य
जायतइत्यस्याकाशादिषुमुख्यस्यप्रागपिप्राणादिषुश्रवणान्मुख्यार्थत्वेनहिसकृदुच्चारितस्य
पदस्यमुख्यत्वगौणत्वंचयुगपत्संभवति॰ यथाग्निर्ज्वलतीतिनिरपेक्षादग्निशब्दान्मुख्यार्थो
गौणश्चेतिनसंभवतीति। तत्पूर्वत्वाद्वाचः। इतश्चतेजोवन्नपूर्वकत्वाभिधानात्। वाक्प्राणमनसा
मन्नमयंहिसोम्यमनः आपोमयः प्राणास्तेजोमयीवागितिप्रतीतानुग्रहंवागादीनांब्रुवंस्तत्सृष्ट
त्वमनुवदतीतिनचोत्पत्तिमंतरेणप्रपंचसत्तावकल्पते अन्येकेचित्सर्वत्रपक्षांतरसिद्धांतविरोध
मपर्यालोच्यतेतोभूयसामितिचन्यायमनादृत्याधिकरणंपूर्वपक्षयायथाविषयंवर्णयंति॰ सि
द्धांतइतिसचानागौणीप्राणानांबुद्धींद्रियाणांमनः पंचानांनामुत्पत्तिश्रुतिस्तानांकर्मेंद्रि
याणांचमुख्येतिकस्मादनादित्वात्तारणसंबंधस्यजीवानांयदिचकरणानामुत्पत्तिरिष्यतेजी

भा० द्वि

वनापतितं समसगतेर्विशेषवाच्च। संख्याविप्रतिपत्तिनिरासार्थमारभ्यते। किं सप्तैवैते कादशैवेति किं तावत्प्रा
प्तं। सप्तेति। किं तावत् गतेर्गतिक्रमं च प्राणोत्क्रान्तौ मनीति कथं गम्यते विशेषितत्वाच्चक्षुरादयो वा
क्यार्थं नास्त्यत्र विशेषितः। हस्तादयस्तु स्थिते। तोनैवं तुशब्दः पक्षनिवृत्तौ हस्तादयोऽन्तः सप्तभ्यो वेदि
श्यते। हस्तो वै ग्रहः स कर्मणातिग्राहेणागृहीतो हस्ताभ्यां कर्म करोतीति स्थितेनच हास्यातिरेकेणैवं
मंतव्यं सप्तैवेति कियन्तः पुनरेकादशः सर्वे शमे पुरुषे प्राणा आत्मैकादश इत्यात्मेति मनो निर्दिश्यते
कार्याणि चैतावन्मनसः संकल्पो विषयो बुद्धीन्द्रियाणां शब्दस्पर्शरूपरसगन्धाः कर्मेन्द्रियाणां वचनादानवि
हरणोत्सर्गानंदाः अणवश्च। स्थूलानीन्द्रियाणीति सांख्यमं न्यन्ते तन्निरासः क्रियते। सूक्ष्मान स्थूलाः परिछि
न्नाश्चोत्क्रांति श्रुतेर्नद्यानी चानुपलब्धेः। श्रेष्ठश्च। श्रेष्ठो मुख्यः प्राणः सचोत्पद्यते कथमेतस्माज्जायते
इति तुल्यश्रुतित्वात् पूर्वन्यायसिद्धे पुनरावेंतार्थं प्रपञ्चप्रयोगकरणं। न वायुक्रिये पृथगुपदेशात्॥ यः
प्राणः स वायुः स एष वायुः पंचविधः प्राणोऽपानो व्यान उदानः समान इति वचनाद्वायुः प्राणः अ
थवा सामान्या करणवृत्तिः प्राणाद्या वायवः पंचेति करणानां सामान्या वृत्तिः प्राण इति सांख्यास्ति श्री

ष्ठंति तदेवं प्राप्ते उच्यते। न वायुरेव कुतो भेदेनोपदेशात्। प्राण एव ब्रह्मणश्चतुर्थः पादः स वायुना ज्योतिषा भाति
च तपतीति तथा वागादीनि करणान्यनुक्रम्य वायोः प्राणस्य पृथगनुक्रमणान्नेह वायु मृत्युस्तं उत
क्रायेति न च करणानां सामान्या वृत्तिश्चक्षुरादीनां विषयग्रहणात्मिका हि वृत्तिः प्रकृतप्राणस्ते
षामनुग्राहकः। यः प्राणः स वायुरिति वायोरेवावस्थांतरं प्राणो न तत्वांतरमिति दर्शनार्थः। ननु श्रे
ष्ठत्वाद्वागादीनां वर्तं प्रतिगुणभावश्रवणाच्च बलिं कुरुते तिसोऽपि स्वतंत्रः स्यादत आह। चक्षुरा
दिवत्तु तत्सह शिष्ट्यादिभ्यः। आशंकानिवृत्त्यर्थस्तु शब्दः यथा चक्षुरादीनि जीवं प्रति गुणप्र
तानि तथा प्राणोऽपि तैश्चक्षुरादिभिः सहनाशात् प्राणसंवादे अचेतनत्वाद्युपकारदर्शनार्थं स्यादि
यहर्यां यदि तर्हि प्राणस्याधिकरणाभावो विषयान्तरं तस्य वक्तव्यमित्याह। अकरणत्वाच्च न
दोषस्तथाहि दर्शयति विषयान्तराप्रसंगान्न दोषः कस्मादकरणत्वात् किं पुनः कर्यमस्येति वेदा ण
हश्रुतिः शरीरक्षणं यस्मिन्नुत्क्रांत इदं शरीरं पापिष्ठतरमिव दृश्यते स वः श्रेष्ठ इति तेन प्रदम्भा
तियत्तु पिबति तेनेतरान् प्राणानवतीति प्राणनिमित्तां शरीरेन्द्रियस्थितिं दर्शयति। पञ्चवृत्तिर्मनो

पद्धा यदृश्यते। यथा मनः स्ववृत्तिभिः संकल्पशुद्ध्यादिभि जीवस्योपकरोति एवं वृत्तिर्यह प्राणस्योपकारदर्शि
भ.टि० नार्थं मुखनासिकासंचारी वृत्तिविशेषः शब्दोच्चारणादिकार्यहेतुः प्राणे मूत्रंपुरीषरेतसामधःपात
किता पानः तयोः संधौ वर्तमानो वीर्यवत्कर्महेतुर्व्यान उदान ऊर्ध्ववृत्तिरुत्क्रमणादिहेतुः सर्वेष्वंगे
षु भक्तं पीतं समं नयतीति समानवृत्तिः। अणुश्च। व्यापी प्राणः सम एभिस्त्रिभिर्लोकैः समानेन सर्वेणेति
श्रुतेस्तत्कथमुच्यते अणुश्च सूक्ष्मः परिच्छिन्नश्चोत्क्रान्तौ पार्श्ववर्तिभिरनुपलभ्यमानत्वात् परिच्छि
न्नश्चोत्क्रान्तिगत्यागतिश्रुतेरुक्तं विभुत्वमाधिदैविकेन समष्टिव्यष्टिरूपेण हैरण्यगर्भेण स्वरूपेण
आत्मनातद्विभुत्वमित्यविरोधः। ज्योतिराद्यधिष्ठानं करणजातमग्न्यादिदेवताप्रेरितं प्रवर्तते क
थं तदाभानादेवतोपदेशादग्निर्वाग्भूत्वा मुखं प्राविशद्वायुः प्राणो भूत्वा नासिके प्राविशदादित्य
श्चक्षुर्भूत्वाक्षिणी प्राविशदिति। यद्येवं भोक्तृत्वं देवतानामेव प्राप्नोतीत्याह। प्राणवता शब्दात्। प्राणा
स्योस्तीति प्राणवान् देहेन्द्रियसंघातस्वामिना प्राणवता जीवेन करणानां संबंधः कथं शब्दात् श्रुतेस्तदा
काशमनुविषण्णं चक्षुः स चाक्षुषः पुरुषो दर्शनाय चक्षुर्यो वेदेदं जिघ्राणीति स आत्मा गंधाय

घ्राणमित्येवंजातीयकात्। तस्य च नित्यत्वात्। तस्य करणजातस्य शारीरं प्रति नियतत्वात्तमुत्क्रामन्तं प्रा
णोऽनूत्क्रामतीति श्रुतेर्देवाः पुनः परस्मिन्नैश्वर्ये स्थितान हीनेन भोगेनार्थिनो न ह वा अमाहं पगच्छतीति श्रु
तेः। ७। त इन्द्रियाणि तद्व्यपदेशादन्यत्र श्रेष्ठात्॥ प्राणस्यैव वृत्तिभेदा वाक्चक्षुरादयो न तत्त्वान्तराणीति प्राप्ते उ
च्यते प्रकृताः प्राणादिन्द्रियाणि तत्त्वान्तराणि कुतस्तेन प्राणेन व्यपदेशादेतस्माज्जायते प्राणो मनः सर्वे
न्द्रियाणि चेति पृथक्त्वात् तथा च व्यपदेशो भवति ननु मनसोपीन्द्रियत्वं न स्यात् नैतदेवं दशैमे पुरुषे प्रा
णा आत्मैकादश इति निर्देशात्। समानजातीयत्वमेकां जातिं क्रियां गुणं वाश्रित्य संख्यायोगः प्रवर्तत
यथा षष्ठो ग्रहा इति रूपादिज्ञानोत्पत्तिहेतुत्वाच्चेन्द्रियत्वं मनसः कथं पुनश्चक्षुरादिषु प्राणशब्दः प्राणवृ
त्तियोगात् गौणस्तस्मादेत एतेनाख्यायन्त इति श्रुतेरन्यत्र श्रेष्ठात् वर्जयित्वा न तस्येन्द्रियत्वमित्यर्थः
भेदश्रुतेः। ते ह वाचमूचुरित्युपक्रम्य वागादीनसुरपाप्मविद्धानुपसंहृत्याथ हेममासन्यं प्राणमूचुरिति
सर्वेन्द्रियेषु परिस्पन्दात्मिका प्राणस्य वृत्तिः साधारणा वृत्तिर्लोचनात्मिकेन्द्रियाणामसाधा
रणी यथायोगं वृत्तिर्दि नेकः। संज्ञामूर्तिक्लृप्तिस्तु त्रिवृत्कुर्वत उपदेशात्। सप्रकारणेते
जीवं नास्तु द्वितीयाध्यायाह सेयं देवतेमास्तिस्रो देवता अनेन जीवेनात्मनाऽनुप्रविश्य नामरूपे व्याकरवाणि

भ. ३०

तासां त्रिवृतं त्रिवृतमेकैकां करवाणीति। तत्र जीवकर्तृकमिदं नामरूपव्याकरणं यथा चारेणाहं परसैन्यम
संकलयानीति प्राप्त उच्यते। तुशब्दः पक्षनिवृत्त्यर्थः संज्ञामूर्तिक्लृप्तिर्नामरूपव्याक्रियेत्यर्थः। सा त्रिवृत्
कुर्वत ईश्वरस्यैव त्रिवृद्रूपामेकैकां देवतामकरोत्। स एवाग्न्यादीत्यादीनां नामरूपमकरोत्। न
हि गिरिसमुद्रादौ जीवस्य सामर्थ्यं कस्मादुपदेशात् व्याकरवाणीति जीवेनात्मनानुप्रविश्येति संबं
धो न पुनरस्य व्याकृपया संबंधोऽस्ति कार्यकारणभावपरिकृतस्य जीवस्य घटरथादिनामरूपव्या
करणे दर्शनादस्तु कस्यचिज्जीवविशेषस्य नामरूपव्याक्रियेत्याशंक्य निरासामर्थ्यमधिकर
णमन्ये तु प्राधानिकानां संसारजन्तमसां यदि नामरूपव्याक्रिया स्यात्ततोपवर्गाभावः स्या
दतोनुसन्धकर्तृकं नामरूपव्याकरणं ततोपवर्गसिद्धिरिति। अतोक्तिमंतव्यलक्षणसंबंधोधि
करणस्येति वर्णयंति तदसत्। कुतः सांख्यमताशंकेदानीं न वेदमेवमंतव्यलक्षणं सर्वत्रैव म
नस्याविशेषात्। सर्वत्र श्रोतव्यलक्षणं श्रुतस्यार्थस्य पश्चाच्चिंतनं मननमुच्यते। श्रवणमनना
भ्यां हितार्थ्यां प्रत्यधिकरणं प्रसक्तार्थं वा वाक्यार्थनिर्णयो जायते। न पुनरन्योन्यानिरपेक्षादन्य श्री:
तरः स्यात्। मांसादि भौमं यथाशब्दमितरयोश्च। त्रिवृत्कृतानां तेजोबन्नानां कस्य को विभाग

इत्याह। सत्यं दर्शनार्थं शरीरस्य भौमेरदं भौमं कार्यं मांसादि यथाशब्दं यो यस्य कार्यस्यात्मावः
शब्दस्तद्यथाशब्दं प्रतिपत्तव्यं तथा हि अन्नमशितं त्रेधा विधीयते तस्य यः स्थविष्ठो धातुस्तत्पुरी
षं भवति यो मध्यमस्तन्मांसं यो निष्ठस्तन्मन इति। इतरयोरप्तेजसोरपि यथाशब्दं कार्यं विज्ञेयं मू
त्रं लोहितं प्राणश्चापामस्थिमज्जा वाक् तेजस इति। यदि त्रिवृत्कृतमेकैकं किमिदमिदमुच्यते
अस्येदं कार्यमस्येदमिति सर्वं सर्वस्यादित्याह। वैशेष्यात्तु तद्वादः तद्वादः। तुशब्दश्चोदितदोष
निवृत्त्यर्थो विशेषस्य भावो वैशेष्यं कस्यचित्कस्यचिद्भूयांसोऽल्पश्च त्रिवृत्करणस्य व्यवहारार्थत्वा
दीश्वरस्य प्रेक्षापूर्वकारित्वात्तेदादयस्तेजोरथविशेषवादो द्विरभ्यासोऽध्यायसमाप्तिद्योत
नार्थः॥०॥१॥ इति शारीरभाष्ये द्वितीयोऽध्यायः॥ ॥ श्रीः॥ समाप्तः॥ ॥ श्रीराम
तदनंतरं प्रतिपत्तौ रंहति संपरिष्वक्तः प्रश्ननिरूपणाभ्यां। अत्र पंचाग्निविद्यामाश्रित्य संसारगति
प्रभेदः प्रदर्श्यते वैराग्यार्थं तस्माज्जुगुप्सेतेत्यंते श्रवणात् जीवो मुख्यः प्राणसचिवः सेंद्रियः
मनस्को विद्याकर्मपूर्वप्रज्ञावेशेन सुखदुःखभोगार्थं पूर्वदेहं विहाय देहांतरं प्रतिपद्यत इत्यवगम्यते
अथैनमेते प्राणा अभिसमायंति। अन्यन्नवतरं कल्याणतरं रूपं कुरुत इति वचनात् इदानी

भ॰ टि॰

दानीं विचार्यते किं भूतसूक्ष्मैः परिष्वक्तो याति उत नेति नेति पूर्वः पक्षः स्वर्गे नरके वा॰ पुण्यफलमनुभूय
ते॰ तत्रैवंभूतमात्रालभ्यं न इति सांख्यादयो मन्यंते॰ नत्नः सिद्धांतोभिधीयते तदंतरप्रतिपत्तौ देहांतरप्रदेशे
देहबीजैर्भूतसूक्ष्मैः संपरिष्वक्तः परिवेष्टितो रंहति गच्छति निर्दिष्टं सूक्ष्मं शरीरं करणानां दशानामाश्र
यभूतं बुद्धिमनसोः पंचानां च वा भूतानां कथं प्रश्ननिरूपणाभ्यां वेत्थ यथा पंचम्यामाहुतावापः पुरुषवच
सो भवंतीति प्रथमं निरूपणा प्रतिवचनं द्युपर्जन्यपृथिवीपुरुषयोषित्सु पंचस्वग्निषु श्रद्धा सोम वृष्ट्य
न्नरेतोरूपा पंचाहुतीर्दर्शयित्वा इति तु पंचम्यामाहुतावापः पुरुषवचसो भवंतीति॰ ननु केवलाभिर
द्भिर्वेष्टनं श्रुतं कथं सर्वैर्वेष्टनमित्याह। आत्मकत्वात्तु भूयस्त्वात्। परिचोदनानि इत्यर्थे तु शब्दः
अपां वायुमात्रदर्शनात्। ननु पार्थिवो धातुर्भूयान्। अग्निवायुपेक्षया भूयस्त्वमुक्तमतो नुपालंभः।।
प्राणगतेश्च। इतश्च सूक्ष्मशरीरस्य गमनं प्राणानां गतिश्रुतेः। तमुत्क्रामंतं प्राणो नूत्क्रामति
प्राणानां गतिश्च निराश्रयानुपपन्ना। अग्न्यादिगतिश्रुतेरिति चेन्न भाक्तत्वात्। यत्रास्य पुरुषस्य
मृतस्याग्निं वागप्येति वातं प्राणा इत्येवं प्राणानामग्न्यादिगतिश्रुतेर्न जीवेन सहगमनमिति॰
चेन्न भाक्तत्वात्। भज्यतेऽरव्या इति पक्षे गौणी या वृत्तिः सा भाक्तः नच प्रवं भाक्तं अग्न्यादिगम

श्री

मौपचारिकं अधिष्ठातृत्वनिवृत्त्यर्थं लोमकेशयोः गत्यदर्शनात् ओषधीर्लोमानि वनस्पतीन् केशा इति। प्रथमे
श्रवणादिति चेन्न ता एव ह्युपपत्तेः। प्रथमेग्नौ द्युलोकाख्ये तस्मिन्नेतस्मिन्नग्नौ देवाः श्रद्धां जुह्वतीति श्रवणात् प्रश्न
यविशेषस्य श्रद्धातापामश्रवणात्। कथं पंचम्यामाहुताविति चेत् न दोषः ता एव ह्यपो यस्मात् श्रद्धाशब्देनोच्यंते
या आपः प्रश्न उपन्यस्ता हि इति हेतोः कथमुपक्रमोपसंहारयोरेवमुपपत्तेः। सादृश्यप्रयोगोपपन्ने श्च श्रद्धा वा अ
पः श्रद्धामेवारभ्य यज्ञेन यजत इति प्रयोगदर्शनात्। अश्रुतत्वादिति चेन्न इष्टादिकारिणां प्रतीतेः। अथ य इमे
ग्राम इष्टापूर्ते दत्तमित्युपासते ते धूममभिसंभवंति इत्युपक्रम्य धूमाधिना पितृयाणेन पथा चंद्रप्राप्ति
कथयति आकाशाच्चंद्रमसमेष सोमो राजेति न इह प्रतिपन्ने तस्मिन्नेतस्मिन्नग्नौ देवाः प्राणाः प्रक्षिपंति
सोयं प्रक्षेपो होमः इहाभिप्रेतः। ननु तं देवा भक्षयंतीति शशांककिरणारब्धदेहानां कथमनुभ
व इत्याशंक्याह।। भाक्तं वानात्मवित्त्वात्तथाहि दर्शयति वेति दोषव्यावृत्तौ भाक्तमेषामन्नत्वं नवै देवा अश्न
न्ति न पिबंति एतदेवामृतं दृष्ट्वा तृप्यंतीति निर्वर्णनिवारणात् भाक्तमेवान्नत्वं। यथा राज्ञां विशोन्नं
विशामन्नं पशव इति अनात्मविदां निंदा ह्येषां केवलकर्मिणां गुणभावो देहं प्रति॰ तथा हि दर्शयति॰
अथ योन्यां देवतामुपास्तेन्योसावन्योहमस्मीति न स वेद यथा पशुरेवं स देवानामिति। कृतात्ययेनु

भा. र.

शयवान् दृष्टस्मृतिभ्यां यथेतमनेवं चा व चंद्रमंडलमारुह्य भुक्तभोगानामवरोहः प्रव्यते· तत्रेदं चिंत्यते किं
निरनुशया· वरोहंति· अहो स्वित् सानुशया इति· यावत्संपातमिति वचनात्। निरनुशया अवरोहंतीति पूर्व
पक्षः। संपतंत्यनेनेति कर्म संपातशब्देनोच्यते· यावत्तदस्ति तावदुषित्वेत्यर्थः। प्राप्यांतं कर्मणस्तस्य यत्किंचे
ह करोत्ययं तस्माल्लोकात्पुनरेत्यस्मै लोकाय कर्मण इति श्रुत्यंतराच्चरणाद्योनिप्राप्तिरिति मन्यंते· ए
वं प्राप्तेभिधीयते कृतस्य यागादेरत्यये भोगेन क्षये सति क्षीणस्येव वदधुस्यत्सानुशयवान् कर्तारमनु
शेते फलोपभोगेय: स्यादित्यनुशयः कर्म तद्वान् वरोहति· दृष्टस्मृतिभ्यां दृष्टा प्रत्यक्षा श्रुतिः तद्य इ
ह रमणीयचरणाभ्यासो ह यत्ते रमणीयां योनि~~मनुशयः कर्मतद्वान वरोहति~~ मापद्येरन्· ब्राह्मण
योनिं वा क्षत्रिययोनिं वा वैश्ययोनिं वा। अथ य इह कपूयचरणाभ्यासो ह यत्ते कपूयां योनिमापद्ये·
रन्· श्वयोनिं वा सूकरयोनिं वा चंडालयोनिं वेति केवलस्वर्गच्युतानां कपूययोनिप्राप्तिमनुपपन्नां
मत्वा कपूयश्रुतिमन्यार्थामर्थवादतया वर्णयंति तदयुक्ता रमणीयश्रुतिवत्· कपूयश्रुतेर
पि कर्मविपाककथनार्थत्वासंभवाति चानात्मविदां केवलकर्मिणां मनुष्यावस्थायां पुण्यापुण्यक
र्तृत्वं रागद्वेषादिवशात् तदन्यथार्थत्वे सूत्रं सुकृतदुष्कृते एवेत्यनुपपन्नं स्मृतिरपि ततः शेषेण विशिष्ट

देशजातिकुलरूपायुःश्रुतिवृत्तवित्तसुखमेधसो जन्म प्रतिपद्यत इति ज्योतिष्टोमादेः स्वर्गार्थात्कर्मणः कश्चि
च्छेषः शक्यते कल्पयितुं श्रुतिप्रमाणत्वादस्यार्थस्य नानुमानमत्र क्रमते· तस्माद्यावत्संपातमिति यत्किं
चेह करोत्ययमिति चंद्रव्यवायादामुष्मिकफलं कर्म तत्सर्वं तत्रैव क्षयिता अवशिष्टेनैहिकफलेन ज
पहोमदानादिनावरोहंतीति छांदोग्यवाक्यमेवार्थोस्माभिः प्रदर्शितो यथा कश्चित्सेवको राजकुलं प्र
विष्टः चिरावस्थानादुपक्षीणतदुपकरणः छत्रपादुकादिमात्रपरिच्छदः स्थातुमशक्नुवन्निवर्तत इति
दृष्टांतो यन्यासोन नह्यसौ हस्त्यादिषु प्रयुक्तेषु तस्य छत्रादिवान्निवर्तते· किं तर्हि छत्रादिना व्यतिरिक्तेने
वमत्र कर्म समुदायापेक्षयोपयुक्तात्कर्मणः कर्मांतरं शेषशब्दवाच्यमिति यथेतं यथागतमनेवं च प्र
त्यवरोहति· यथेतमिति क्रियाविशेषणमनेवमिति विपर्ययेणेत्यर्थः। पितृयाणे धूमाकाशयोर्निर्दि
ष्टयोरवरोहे संकीर्तनाद्यथेतमित्युक्तं अभ्रादीनामुपसंहारादनेवमित्युक्तं चरणादिति चेन्नोप
लाक्षणार्थेति ताजिनिः। ननु रमणीयचरणा इति चरणं शीलमाचार इत्यनर्थांतरं अद्रोहः सर्वभूतेषु
कर्मणा मनसा गिरा। अनुग्रहश्च ज्ञानं च शीलमेतद्विदुर्बुधा इति स्मरतेः न तस्मान्न कर्मणावरोहो
वर्णित इति चेन्न कर्मणोपलक्षणार्था चरणश्रुतिरिति कार्ष्णाजिनिराचार्यो मन्यते स्म। आनर्थ

यमिति चेन्न तदपेक्षत्वात् । आचारस्यानर्थक्यं एवं सति स्यादिति चेन्नायं दोषः । तदपेक्षत्वात्तं मो
धिकारस्याचारपूर्वकत्वात् । आचारहीनं न पुनंति वेदा इति स्मृतेः ॥ सुकृतदुष्कृते एवेति तु बादरिः
सुकृतदुष्कृते एव चरणशब्देनोच्येते । चर्यतेऽनुष्ठीयते चरणं कर्म नहि लोके वेदयोश्चरणशब्दः शीले प्रसि
द्धः । शब्द उपलक्षणार्थं निहत्यर्थो न हि मुख्ये संभवति लक्षणा श्रयणीयेति । अनिष्टादिकारिणा
मपि च श्रुतं इदानीं चिंत्यते अनिष्टादिकारिणो ये के चास्माल्लोकात्प्रयांति चंद्रमसमेव ते सर्वे
गच्छंतीति । ननु सुकृतीनां दुष्कृतकर्मभिः समानफलत्वमयुक्तमित्याह ॥ संयमने त्वनुभूये
तरेषामारोहावरोहौ तद्गतिदर्शनात् ॥ तुशब्दो वादितदोषनिरासार्थः ॥ संयमने यमालये दुः
खमनुभूय इतरेषामारोहावरोहौ तत्र दुःखमनुभूय चंद्रमंडलमारुह्यावरोहंतीति । कथं गम्यते
तद्गतिदर्शनात् यमालयगमनदर्शनात् । पुनः पुनर्वशमापद्यते मे वैवस्वतं संगमनं जनानामिति
च । स्मरंति च । इतश्च व्यासादयो नाचिकेतोपाख्यानादिषु अपि च सप्त । समुच्चयार्थोऽपिशब्दः
स्मरंति सप्त रौरवादीनिति । सप्त नरका रौरवमहारौरवप्रभृतयः ॥ ननु चित्रगुप्तादयोऽपरे स्मर्य

ते कथं यमस्याधिष्ठातृत्वमत आह । तत्रापि च तद्व्यापारादविरोधः । तत्रापि रौरवादिष्वपि यमव्यापारा
दाज्ञाकरणादविरोधः । अयमसिद्धांतः । विद्याकर्मणोरिति तु प्रकृतत्वात् । तुशब्दः पक्षनिवृत्तौ अनिष्टादिकारि
णां चंद्रावरोहावरोहौ न स्तः । कथं पञ्चाग्निविद्यायां वेत्थ यथासौ लोको न संपूर्यत इति अस्य प्रश्नस्य प्रतिव
चने अथैतयोः पथोर्न कतरेण चन तानीमानि क्षुद्राण्यसकृदावर्तीनि भूतानि भवंति जायस्व म्रियस्वेत्ये
तत्तृतीयस्थानं तेनासौ लोको न संपूर्यत इति अनिष्टादिकारिणामवरोहं दर्शयति । पथोरिति च विद्या
कर्मणोर्निर्देशः । तयोः प्रकृतत्वात् । तद्य इत्थं विदुरिति देवयानः पथा इष्टापूर्ते दत्तमित्युपासते पितृयाणः तयो
रन्यतरेणापि येन गच्छंति तान्विमानितृतीयस्थानभाञ्जि भूतानीति कौषीतकिश्रुतिरप्येवं श्रुतिस्त्वपोर
धिकृताकृताद्दुष्टादिकारिणः ते सर्वे इति विषयविशेषो या केचिदसौ वाव लोको गौतमाग्निरिति विकार
। वाचिना अग्निशब्देन तल्लक्षणा यायात्प्रपद्यते । तदुपासनादर्चिरादिना गच्छा भवत्यग्निरिति कल्प्यं
तित दसत् । अश्रुतत्वात् । यः श्रूयते प्रतीयते अर्थः स शब्दः न ह्याग्निशब्दो यस्य प्रत्याययति न हि घटमा
नयेत्युक्ते पटाहिं राज्ञमानीयते योगिके व्याग्निशब्दस्य योगरूढत्वमेव गमनार्थोऽग्निरिति न तः पंचाग्नौ न

भा. ९० देवैति चोपसंहारात् इत्थीनामैवापास्य तं शक्नुः पूतः पुरापलोको भवतीति हिरण्यगर्भलोकं दर्शयति तत्र ज्ञाने
कर्मं प्राप्य परब्रह्मप्राप्तिरिति निश्चयो ब्रह्मलोकं गमयतीति श्रुतिसामर्थ्यात्। न तृतीये तथोपलब्धेः॥ नन्वती
येस्थाने पंचम्यामाहुतावितिनियमोऽस्ति पंचम्यामाहुतौ पुरुषशब्दवाच्यत्वमवधार्यते। नापंचम्यामा
हुतौ वार्यते वाक्यभेदप्रसंगात्। तथोपलब्धेः उपलब्धेरन्यतरेणाहुतिसंख्यानियममुक्तो न प्रकारेण
तृतीयस्थानप्राप्तिरुपलभ्यते। जायस्व म्रियस्वेत्येतत् तृतीयं स्थानमिति। स्मर्यतेऽपि च लोके। अपि
च लोके स्मर्यते सीताद्रौपदीप्रभृतीनामयोनिजत्वं। दर्शनाच्च। इतश्च चतुर्विधो भूतग्रामो जरा
युजाण्डजस्वेदजोद्भिज्जलक्षणाः तत्र योषित्पुरुषसंबंधमंतरेणास्वेदजस्थावरयोर्दर्शनात्
नाहुतिसंख्यानियमः ननु त्रिरा एव बीजानि भवंति आण्डजं जीवजमुद्भिज्जमित्यत्राविरोधोऽप
तयामश्रूयते। कथं चतुर्विधत्वमित्याह। तृतीयशब्दावबोधः संशोकजस्य। तृतीयेनोद्भिज्जशब्देन अ
वरोधोऽन्तर्भावः संशोकजस्य स्वेदजस्येत्यर्थः। स्वेदजोद्भिज्जयोर्भूम्युदकोद्भवत्वतुल्यत्वात्॥
स्वाभाव्यापत्तिरुपपत्तेः। अवरोहप्रकारश्चिंत्यते। तथेतमेवाध्वानं पुनर्निवर्त्तन्ते। यथेतमाकाशमाका

शाद्वायुं वायुर्भूत्वा धूमो भवति धूमो भूत्वाभ्रं भवति अभ्रं भूत्वा मेघो भवति मेघो भूत्वा प्रवर्षतीत्याका
शादिस्वरूपापत्तिरिति पूर्वः पूर्वः पक्षः। सिद्धांतस्तु साभाव्यापत्तिराकाशादिसादृश्यप्राप्तिरित्यर्थः। क
थमुपपत्तेः। न ह्यन्यस्यान्यभाव उपपद्यते तत्तत्सादृश्यं तु युज्यते। नातिचिरेण विशेषात्। दीर्घं का
लं सादृश्येनावस्थानं स्यात् अल्पकाले हेत्वभावादिति प्राप्ते ब्रूमः। नातिचिरेणाल्पेनकालेनावरो
हः। यावद्व्रीहिप्राप्ति। तत्राविशेषवचनात्। अतो वै खलु दुर्निष्प्रपतरमिति व्रीह्यादिभावादूर्ध्वं दुःख
निर्निःसरणमिति ब्रुवन् पूर्वं चाचिरकालतां दर्शयति। अन्याधिष्ठितेषु पूर्ववदभिलापात्। इह व्रीहियवा
ओषधिवनस्पतयस्तिलमाषा इति जायंत इति व्रीह्यादिजन्मानुशयिनां मुख्यं लक्षणा हि त्वभा
वादिति पूर्वः पक्षः तत्राभिधीयते। जीवान्तराधिष्ठितेषु व्रीह्यादिषु संसर्गमात्रमनुशयिनः प्रतिपद्यंते न
शब्दात्। अथ सांख्यचोदयति ज्योतिष्टोमादिकमशुद्धमग्नीषोमीयपशुहिंसायोगात्। अधर्मत्वा
न्मिश्रमतो व्रीह्यादिजन्म मुख्यमेवानुशयिनामिति नेत्युच्यते। अशुद्धमेव कर्म कुतः। शब्दात्। शास्त्रप्रमा
णकत्वात्। धर्माधर्मयोः नाहिंस्यात्सर्वाभूतानीति सामान्याबाधः संकर्षन्न विधिविशेषः सा
मान्यविधेर्विशेषविधिर्बलीयान्। यथा यदाहवनीये जुहोति तेन तेन सोऽस्याभीष्टः प्रीतोऽपव

भा· ८· नीतिसामान्यविधिः पदेऽनुहीतविशेषविधिना बाध्यते· तद्वद्ब्राह्मं साधं सावकाशत्वां निरवकाशत्वा
त्तुकर्तृगतस्याविष्णाभावे धेदंतोगोपामंत्रजन्मरेतः सिग्योगाञ्च। इतश्चयजादिसंश्लेषमात्रं श्रीह्याद
भावानंतरमाम्नायते योपोषुन मार्तर्ये रेतःसिंचति तद्भ्य एव भवतीसंनासंश्लिष्टो नृशयात्। द्वारेण रेतः
सेचनसामर्थ्येन पुरुषेण संयुज्यते· न पुनरशयं रेतःआसिआवं प्रतिपद्यते· तथा तत्रतया गमात्रविवक्षा
तथा श्रीह्यादावितिसूत्रार्थः। तद्रूपत्वमभवतीति· तदाकृतिवतीत्यर्थः। मनुष्येणाभक्षितो। नुशयामनु
ष्याकृतिः मेषणभक्षितो मेषाकृतिर्भवति योनेः शरीरं रेतःसिग्योगानन्तरेस्त्रीयोनेरधिशरीरं दर्शय
तिशास्त्रं तद्य इहरमणीयचरणा इति तदपि श्रीह्यादिसंश्लेषमात्रेयुज्यते॥ ॥ तृतीयाध्यायस्यप
थमःपादः॥ ॥ संध्येसृष्टिराह॥ जागरितावस्था चिंतिता· स्वप्नावस्थाचिंत्यते· जीवस्यस्वयंज्यो
तिः ष्ट्वप्रसिद्ध्यर्थं सुषुप्तावस्था च सर्वोपाधिनिर्मुक्तमभयरूपमादर्शयितुं। अन्ये तु ध्यानोपयोगा
र्थमितावविवेचयंति· यद्यपारमार्थिकं तथापि निर्वाणं तदाविद्यायाः परिक्षयार्थं ध्यानरूपपद्य
तद्रूलाधिकरणसंबंधं वदंति। तृतीयस्य ध्यानलक्षणत्वादिति तदयुक्तं प्रथमेप्यध्यायेपत्किं

विद्वीचारितं तत्सर्वं योगिनेया। अंतस्तद्धर्मोपदेशात् दहवउत्तरेभ्य एवमादि। संध्येस्वप्नस्थाने संध्यंत
नीयं स्वप्नस्थानमिति श्रुतेः इहलोकपरलोकयोः संध्यो जाग्रत्सुषुप्तयोर्वामध्ये वर्तत इति संध्यं
तत्रसृष्टिः पारमार्थिकी यतःश्रुतिराह· न तत्र रथा न रथयोगा न पन्थानो भवंति अथ रथान् रथयोगा
न् पथः सृजते स हि कर्तेति। निर्मातारं चैके पुत्रादयश्च। इतश्च कामानां निर्मातारं कर्तारं परमा
त्मानमेके शाखिनः समामनंति· य एषु सुप्तेषु जागर्ति कामं कामं पुरुषो निर्मिमाण इति· काम्यंत
इति कामाः पुत्रादयस्तत्रकामाउच्यंते· शतायुषः पुत्रपौत्रान्वृणीष्वेति प्रक्रमात् तदेवशुक्रं तद्ब्र ६
तदेवामृतमुच्यत इति च वाक्यशेषात्· स्वप्नप्रपंचस्य निर्माता परमात्मा तस्य च सृष्टिः त
थाभूता जाग्रद्वत् सृष्टिवदिति पूर्वपक्षः। मायामात्रं तु कार्त्स्न्येनानभिव्यक्तस्वरूपत्वात्। तुशब्दः
पक्षंव्यावर्तयति स्वप्ने सृष्टिर्मायामात्रं न वाधार्योस्तीतिमात्रग्रहणं का पुनरियं मायाशब्दस्य
प्रत्ययः तथा हि नैरुक्तैः प्रज्ञा नाम स्वपठ्यते· माया वयुनं अभिख्या प्रज्ञा था इति· न त्वेवं निरालं
बनः प्रत्ययः प्राप्नोति नायं दोषो देशांतरकालांतरानुभूतानुस्मरणात्· स्वप्ने पूर्वमदृष्टानार्थाः

भा॰ ५८॰

नुभवजनितवासनावासितं मनो नाडीषु परिवर्तमानं स्वप्नज्ञानहेतुर्भवति शुभाशुभकर्मप्रेरितं मोहवासना
दिदर्शनात्। स एव स्मर्यमाणोऽर्थः प्रत्ययालंबनमिति न दुष्यति। दर्शयति च यानि ह्येव जाग्रत्पश्यति तानि सु
प्त इति जीवस्यैवैषा सृष्टिः सुखदुःखप्रतिभासनान्नेश्वरस्य। तथा च श्रुतिः। य एष स्वप्ने महीयमानश्चर
त्येष आत्मेति ईश्वरस्य तु या सृष्टिराकाशादिविषया सा परमार्थैव। अत एव वैधर्म्याच्च न स्वप्नादिवद
दित्युक्तं तर्कपादे। ये पुनर्जागरितावस्थायामपि मायामात्रमिमां घोषयंति ते सत्यकामाभिप्रायं नाशयंतः श्रो
त्रियजनं व्यामोहयंति किं पुनर्जागरितप्रत्ययेनास्य वैधर्म्यमुच्यते कार्त्स्न्येनानभिव्यक्तरूपत्वात् दे
शः कालो विषयसंनिधिरिंद्रियव्यापारो बाधाभावश्च कार्त्स्न्यं तेनानभिव्यक्तस्वरूपलाभाभावात् स्वप्न
स्य॥ सूचकश्च हि श्रुतेराचक्षते च तद्विदः। इतश्च जीवसृष्टिरेषा यतः शुभाशुभसूचकः स्वप्नः श्रुतेः
प्रतीयते। यदा कर्मसु काम्येषु स्त्रियं स्वप्नेषु पश्यति। समृद्धिं तत्र जानीयात् तस्मिन्स्वप्ननिदर्शने
इति। स्वप्नविदश्च कथयंति आरोहणं गोवृषकुंजराणां स्वप्नेषु गम्यागमनं च धन्यमिति। स्वप
नेतैलाभ्यंजनाद्यधन्यानीति। न हि प्राज्ञस्य सुखदुःखभोग्यता वक्तव्येति। परस्यापि हेतुकर्तृ

त्वात्तत्त्वाद्निर्मातारमिति चाक्षेप्तुं जीवपरयोरभेदात्। यद्यप्यभेदो जीवस्यापीश्वरवत्संकल्प
कौ सृष्टिरस्तु तत्रोत्तरं॥ पराभिध्यानात्तु तिरोहितं ततो ह्यस्य बंधविपर्ययौ॥ चोदितदोषनिवृत्त्यर्थः
तुशब्दः सत्यमेकत्वं तदंशत्वाच्च तत्तु न भिन्नं स्वाभाविकं रूपं अज्ञानतिमिरपिहितं परमभिध्याय
तोऽभिव्यज्यते। प्रागभिव्यक्तेर्न संकल्पसिद्धिः यस्मात्तत ईश्वराज्जीवस्य बंधविपर्ययौ। बंधः संसृति
रज्ञानाद्विपर्ययो मोक्षः सम्यग्ज्ञानात्। तथा च श्वेताश्वतरीयमंत्रः ज्ञात्वा देवं सर्वपाशापहानिः क्षी
णैः क्लेशैर्जन्ममृत्युप्रहाणिः तस्याभिध्यानात्तृतीयं देहभेदे विश्वैश्वर्यं केवल आप्तकाम इति। ननु व
ह्निस्फुलिंगस्येव दहनशक्तिरैश्वर्यशक्तिरपि जीवस्योक्ता किं निबंधनस्तिरोभाव इत्याह। देहयोगाद्वा
सोऽपि तिरोभावो देहयोगात्। यद्येवमत्यंतं भेदस्तु वास्तु किमभेद एवास्तूपगमने त्याशंकानिवृत्त्यर्थो
वाशब्दः। तत्त्वमसीति श्रुतेर्भिन्नाभिन्नो जीवः स्वाभाविकं नित्यसिद्धं मत्यंतरूपमतद्दोषा
धिकं प्रवाहनित्यमिति विवेकः। स्वयंज्योतिष्ट्वप्रदर्शनार्थं स्वप्नप्रकरणमिति रूपाधिभावोक्तः
ननु च यदा द्रष्टाभावं दर्शयति। तदभावो नाडीषु तच्छ्रुतेरात्मनि च। तद्यत्रैतत्सुप्तः समस्तः

भा. २८

संप्रसंनः स्वप्नं न विजानात्यथ तदा नाडीषु सृप्तो भवति नाडीमेवोपक्रम्यान्यत्रोक्ता श्रुतिः प्रत्यवसृप्य पुरीतति शेत इति। तथान्यत्र सता सोम्य तदा संपन्नो भवति प्राज्ञेनात्मना संपरिष्वक्तो न बाह्यं किंचन वेद नांतरमिति आसां श्रुतीनामन्योन्यनिरपेक्षत्वात् सुप्तिस्थानविकल्पप्राप्ताविच्यते। समुच्चयः स्याद्। कथं तदभावः स्वप्नदर्शनाभावः तदात्मनि नाडीषु च न विकल्पेनेत्यर्थः। कुतस्तेषां नाडीपुरीततदात्मनां सुषुप्तिस्थानत्वेन श्रवणान्नाडीष्विति। सप्तमी तृतीयार्थो विपरिणेया। नाडीभिर्हार्दीर्हृदयाकाशं परमात्मानं मासाद्य स्वपितीति तेजसा हि तदा संपन्नो भवतीति तेजःशब्दोऽत्र तन्निष्ठद्रव्यः। कस्माद्विभक्तिविपरिणयः। नाडीसुप्तस्य निःसंज्ञत्वे हृत्स्था बाद्धिरत्वतु सति संपद्यनाव इति पुरीततं नाम हृदयवेष्टनं तत्र शेत इति व्यपदिश्यते हृदयाकाशशयाने यथा गर्भगृहे शयानः प्रासादे शेते इत्युच्यते। संभवति समुच्चयेन विकल्पोऽयुक्तः पक्षेऽन्यतमबाधप्रसंगात्। अतः प्रबोधोऽस्मात् यस्माद्धास्मात्सुप्तिस्थानं अत एव हेतोरस्मादात्मनः प्रबोधः जीवस्य जागरितस्थानप्राप्ति

रुपपद्यते। प्रबोधहेतुश्चेश्वरः कर्म च तस्माद्ब्रह्मैव सुप्तिस्थानमिति स्थितं॥ अन्ये तु स्वप्नसुप्तिप्रलयवद्विद्याविलयस्तत्र च ध्यानशास्त्रानर्थक्यं तन्मा भूदिति ध्यानलक्षणोऽस्मिन्नधिकरणमारब्धमिति कल्पयंति तदयुक्तं। सर्वमेवमेव ब्रह्मोपयोगार्थं चिंत्यते नेदमेव लक्षणमित्युक्तं न च सुषुप्तिमात्रेणाविद्यानिवृत्त्याशंका तमेवाविदित्वाति मृत्युमेति नान्यः पन्था विद्यतेऽयनायेति वचनात्। अतः सदेव सुप्तिस्थानमिति सुप्तिन्यायोत्पादनार्थमधिकरणं चायं सुषुप्तः तद्ब्रह्मात्मत्वसंसारोपप्लवरहितं प्राप्तव्यमिति ज्ञापनार्थं सुषुप्तिप्रकरणं॥ ॥ स एव तु कर्मानुस्मृतिशब्दविधिभ्यः अनंतरोक्तः प्रबोधः चिंत्यते। किं य एव सुप्तः स एवोत्तिष्ठति स्वशरीरे अथान्य इति अनियमहेतुभावादिति प्राप्त उच्यते स एव कुतः शर्मणो शेषानुमानात् पूर्वेद्युरर्धकृतं कर्मानुसंधायापरेद्युः प्रवर्तते। तथानुस्मृतेः। अहमिदमदर्शमित्यात्मानं प्रत्यभिजानाति तथा शब्देभ्यः प्रतिन्यायं प्रतियोन्याद्रवति बुद्धांतायैवेति तथा विधिशब्देभ्योऽग्निहोत्रं जुहुयात्

आत्मानमुपासितेत्यग्निहोत्रादि कर्म स्वर्गं कुर्वन्नेव यथेष्टं तिष्ठति तत्तोऽधिकारविरोधः स्यात्। तस्मा
त्सर्वोऽपि तिष्ठति नान्यदिति· एषामीश्वर एव साक्षात्संसारी इति दर्शनं· तेषां न पूर्वपक्षो विकल्पेन नास्ति मुग्धे
मुग्धेर्ध संपत्तिः परिशेषात्। किमर्थमिदं चिंत्यते· यदि मुग्धः सुप्तावस्थो वधार्यते तदुह सुप्तं ध्रुव
वन्न प्रबोधयेदिति· धुरानी प्राभि घात न प्रबोधो न कर्तव्य इति· प्रयोजन मुग्धे संसवसंपन्न इ
ति प्रदर्शनार्थं जागरितः स्वप्नः सुषुप्तिरुत्क्रांतिरिति च तस्यावस्था जीवस्य प्रसीन पंचमी का
दिति प्राप्तावुच्यते मुग्धे मूर्छिते मुपलाद्यभिहते अर्द्धसंपत्तिर्मरणस्थानस्यार्द्धं संपद्यते· मुग्धः कु
तः परिशेषाद्विषदर्शनाभावान्न जागरितस्वप्नांतर्भावो न मृतः प्राणोष्मणोर्विद्यमानत्वात् न सुषु
प्तस्तद्वैलक्षण्यात्। सुषुप्तो हि प्रसन्नवदनो भवति निमीलितनेत्रः स्वासं यथाक्रमं मुंचति॥
तस्मादर्द्धसंपत्तिः। कर्मशेषे सति प्राणोष्माणोऽपुनरागच्छतः प्रत्र प्रयुक्ते ततु न प्राणोष्माणो
प्रत्यावर्तेते इति स्थितं। न स्थानतोऽपि परस्योभयलिंगं· सर्वत्र हि सुषुप्तावस्थायां यत्र जीवः संप
द्यते तस्य ब्रह्मणः सतत्त्वमनुनाविचार्यते ननु चेष्टाते नाशाहूमिस्वामिरस्य चेतनं ब्रह्म समस्तजग

त्कारणमित्युक्तं अनन्यत्व मसतः तानि द्वारितमेवा किमर्थमिहाचिंत्यते· सत्यं भेदरूपमभेदरूपं चोपास्यं
उतोभयसंदुल सम स्तभेद मभिन्नं संलक्षणबोधरूपमुपास्यमित्ययमंशो विचार्यते निर्गुणब्रह्मचोदना
यां सगुणोस्तु तशाणत्वविद्यादिषु नायं विचारः सगुणोपासितस्य न चैत त्प्रतिकरणं चोदनास्या
मर्थ्येन निर्णीतत्वात्। अत्र पूर्वपक्षवादी मन्यते साकारं निराकारं च ब्रह्मोपास्यमुभयाबगमात्।
कारणात्मनाप्रपंचात्मना च ब्रह्मावस्थितं यथावस्थितं वस्तूपासनं च युक्तं एवं प्राप्तेऽभिधीयते· नो
भयलिंगं ब्रह्मोपास्यं प्रपंचाकारेण साकारं निराकारं च लिंगलक्षणं चिह्नमुच्यते· निराकारमेवो
पास्यं शुद्धं कारणरूपं कस्मादस्थूलमनराव ह्रस्वमिति प्रपंचाकारस्य समस्तस्य निवर्तितत्वात्
स्वतश्च कारणं कूटस्थं नित्यमेकमेवाद्वितीयं यश्चानुकार्यं कादाचित्कं प्रवर्तते ननु विकारात्मक
मेव कारणं विकारपरित्यागे कारणस्वरूपमेव त्यक्तं स्यात्। न तस्य कारणमुपास्यमिति तदेव
हीयेत तस्मात्पृथिव्यादिस्थानाकार संयुक्तं ब्रह्मस्वरूपमुपास्यमिति। निरुच्यते· न पृथि
व्यादिस्थानतोऽपि परस्योभयलिंगता स्वतोऽभिन्नत्वादागंतुकत्वाच्च पृथिव्यादिस्थानकृतस्य स्व

भा०८० यस्य ब्रह्मादिनामरूपप्रपंचो नाम प्रपंचात्मकं ब्रह्म यथा समुद्रात्मकः फेनतरंगादिर्न तदात्मकः समु
द्र इति कथं पुनर्गम्यते यतः सर्ववेदांतेषु निःप्रपंचं ब्रह्मोपास्यमवधार्यते। अशब्दमस्पर्शमरूप
मव्ययं स एष नेति नेत्यात्मा अस्थूलमिति चाप्ततभौतिकरूपनिराकरणात्। न चैवमगतव्यम
तो मायामात्रमिदं सर्वं प्रातामिति कारणकार्यरूपं अनेकविधे नास्तीत्यवधार्यते न पुनः प्रपं
चरूपस्वभावः प्रतिपाद्यते। भेदादिति चेन्न प्रत्येकमतद्वचनात्। सर्वाणि भूतानि सर्व एव आ
त्मनः समर्पिता इति मूर्तामूर्त्तेन वाह्यप्रपंचेन नेमिस्थानीयेन परिवेष्टितानामरस्थानीया
नां विज्ञानात्मनामंतरतमे परमात्मनि रथचक्रनाभिस्थानीये समर्पणाद्भेदो गम्यते अतो
भेदाद्भोग्यभोक्त्राकारवदुपास्यमिति चेन्न प्रत्येकवचनतद्वचनात्। प्रत्युपाधिभेदवचनात्सा
वादित्यर्थः। अध्यात्ममधिदैवतं च यो विज्ञानात्मनस्तेषां सर्वेषामचेतनानां च भूतभौतिका
नां यत्रैकीभावः स एव परमात्मा ध्यायत्वेनोपदिश्यते मधुविद्यायां यश्चायमस्यां पृथिव्यां
तेजोमयोऽमृतमयः पुरुषो यश्चायमध्यात्मं शारीरस्तेजोमयोऽमृतमयः पुरुषोऽयमेव स योऽयमात्मेत्यादि

ना॥ अपि चैवमेके॥ अपि चैवं भेददर्शननिंदापूर्वकं अभेदमेवापास्यमेके शाखिनः समामनंति मन
सैवेदमाप्तव्यं नेह नानास्ति किंचन। मृत्योः स मृत्योः समृत्युमाप्नोति य इह नानेव पश्यतीमि न्नं॥
तथा श्वेताश्वतराणां भोक्ता भोग्यं प्रेरितारं च मत्वा सर्वं प्रोक्तं त्रिविधं ब्रह्ममेतदिति भोक्तृभोग्यनियं
तृरूपस्य त्रिप्रकरणपर्यालोचनया प्रपंचरूपतायामरूपवदेव ब्रह्मावधार्यते तत्प्रधानत्वादित्या
ह। अस्थूलमनण्वह्रस्वमदीर्घमशब्दमस्पर्शमरूपमव्ययं आकाशो वै नाम नामरूपयोर्निर्वहिता
ते यदंतरा तद्ब्रह्म दिव्यो ह्यमूर्तः पुरुषः सबाह्याभ्यंतरो ह्यजः तदेतद्ब्रह्मापूर्वमनपरमनंतरमबाह्य
मयमात्मा ब्रह्म सर्वानुभूरित्येवमादीनां वाक्यानां त्रिप्रकरणव्याप्यरूपत्वे ब्रह्मप्रतिपादने तात्प व
र्यं दृष्टं तत्प्रत्यायनादवगम्यते। अतः संलक्षणमेवाद्वितीयं प्रलयावस्थायामेवोपसंहृतसम
स्तविकारं ब्रह्म सर्वानुभूरित्येवमादीनां वाक्यानां त्रिप्रकरणह्मस्मात्तद्ध्येयं। एवं तर्हि संलक्ष
णमेव ब्रह्म त्वनबोधलक्षणमित्यत आह। प्रकाशवच्चावैयर्थ्यात्। प्रकाशश्चैतन्यं ज्योतिरस्यास्ती
ति प्रकाशवद्बोधरूपं ब्रह्मेत्यर्थः। शास्त्रस्यावैयर्थ्यात्। तमेव भांतमनुभाति सर्वमादित्यवर्णं

नमसः परस्यादिति। आह च तन्मात्रं। चैतन्यमात्रं रूपांतररहितं स यथा सैन्धवघनोऽनंतरोऽबाह्यः कृ
त्स्नो रसघन एवैवं वा अरेऽयमात्माऽनंतरोऽबाह्यः प्रज्ञानघन एवेति वहिरंतश्च यथा लवणरसः सैंधव
स्तथायमात्मा विज्ञानघन एवेत्यर्थः। श्लोकौ चात्र भवतः। अस्मात्याति प्रपंचोयं रूपं हित्वानुवैकृतं। जहा
ति काठिन्यावस्थां जलधौ लवणं यथा। चेतने चेतनं क्षिप्तमभेदाच्चेतनी भवेत्। ऊष्मायां वस्तुविन्य
स्तं न स्वर्वं लवणी भवेत्। दर्शयति चाथोपि स्मर्यते मंत्रो दर्शयति नित्यो नित्यानां चेतनश्चेतनानामि
ति। स्मर्यते गीतासु। आदित्यवर्णं तमसः परस्तात्। आह याज्ञवल्क्यः। अनन्यविषयं कृत्वा मनो
बुद्धिस्मृतींद्रियं। ध्येय आत्मा स्थितो योसौ हृदये दीपवत्प्रभुरिति। अत एव चोपमा सूर्यकादिवत्
यतः स्वलक्षणबोधलक्षणं च ब्रह्मैकमद्वितीयमुपास्यं अत्र योगशास्त्रेषु जलसूर्यकादिवद्
त्युपमोपादीयते। यथा ह्ययं ज्योतिरात्मा विवस्वानपो भिन्ना बहुधैकोनुगच्छन्। उपाधिना क्रि
यते भेदरूपो देवः क्षेत्रेष्वेवमजोयमात्मा। एक एव हि भूतात्मा भूते भूते व्यवस्थितः। एकधा बहुधा
बहुधा चैव दृश्यते जलचंद्रवत्। इति। एकसावता निर्विकारो जलसूर्यकाद्युपाधिभिन्नाः तद्वत्पर

मात्मान देशाप्रता जीवादृति। अंबुवदग्रहणं न तथात्वं। अधुना दृष्टांतवैधर्म्यमुच्यते। सवितुर्भिन्नदेशस्यांबुना ग्रहणा
द्युक्ता जलसूर्यकादयः। अचलमूर्तस्य परमात्मनः सर्वगतस्य च न संभवं कल्पादयो भिन्नदेशांबुषु प्रतिबिंबोदयः स्या
द्। इत्यत्र प्रतिविधीयते। वृद्धिह्रासभाक्त्वमंतर्भावादुभयसामंजस्यादेवं। नहि दृष्टांतदार्ष्टांतिकयोरत्यंतसाधर्म्य
विवक्षितांशसंभवा आह दृश्यवच्चोपन्यस्यते किंपुनः साहृश्यं वृद्धिह्रासभाक्त्वं यथा जलदृश्यो वर्द्धते ह्रासे च ह्रसति
सूर्यकादिः तथोपाधिर्धर्मानुविधायिषु जीवेषु सामान्यात्मना परमात्मा निर्विकारस्वमहिमस्थावर्तत इति॥
दृष्टांतप्रणयनं। कस्मात्पुनरुपाधिधर्मान् भजंते सेन ज्ञास्तदंतर्भावादुपाधिपरिप्लुतत्वादेव उभयोर्दृष्टां
त दार्ष्टांतिकयोः सामंजस्यादविरोधः दर्शनाच्च। कथं पुनर्जीवात्मनां परमात्मांशभूतानां अंतर्भा
वो गम्यते। दर्शनात्। अनेन जीवेनात्मनानुप्रविश्य पुरश्चक्रे द्विपदः पुरश्चक्रे चतुष्पदः पुरः स पक्षी
भूत्वा पुरः पुरुष आविशदिति। तस्माद्युक्तमत एव चोपमा सूर्यकादिवदिति। प्रकृतैतावत्त्वं हि
प्रतिषेधति ततो ब्रवीति च भूयः। इतश्च प्रपंचाकारविनिर्मुक्तं स्वलक्षणं च ब्रह्म निदिध्यासि
तव्यं। द्वे वाव ब्रह्मणो रूपे मूर्तं चैवामूर्तं चेति उपक्रम्य महारजनादीनि रूपाणि दर्शयित्वा

भा० ८० म्नायते॰ अथात आदेशो नेति नेति न ह्येतस्मादिति नेत्यन्यत्परमस्तीति शुद्धमुक्तस्वरूपमवधारयति॰
कथं मूर्तशब्देन भूतत्रयमुच्यते अमूर्तशब्देन च भूतद्वयं माहारजनादिरूपं जीवस्य वासनामयं
तत्र प्रथमो नेतिशब्दो मूर्तामूर्तनिषेधको द्वितीयो वासनाप्रतिषेधकः तदेव वीप्सायुक्तेन प्रतिषे
धेन भूतपंचकं सूक्ष्मं वासनारूपं यत्किंचिदचेतनजातमनात्मरूपं पर्युदस्य शुद्धमात्मरूपमु
पदिष्टं भवति न पुनः प्रपंचस्यैवाभावः प्रतिपाद्यते अनंतरवाक्यं स्पष्टयति तदाह। प्रकृतौ ताव
च्छब्दं प्रकृतस्य यदेतावत्त्वमुपाधिद्वयपरिच्छिन्नत्वं तत्प्रतिषेधति ततो निर्विकल्पकं परिशि
ष्टं ब्रह्म भूयः पुनर्ब्रवीति अन्यत्परमस्तीति॰ एषा चात्राक्षरयोजना न ह्येतस्मादिति नप्रपंच
प्रतिषेधरूपादादेशनादन्यत्परमादेशनं ब्रह्मणोऽस्तीति तस्मान्नेति नेत्युक्तमिति श्रुतेरभिप्रा
यः। ततो ब्रवीति भूयः इत्येतन्नामधेयविषयं योजयितव्यं अथ नामधेयं सत्यस्य सत्यमि
ति प्राणा वै सत्यं तेषामेष सत्यमिति ब्रवीति॰ अपरे तु प्रकृते नावद्यमित्सारभ्या
धिकरणांतरं कल्पयंति नेति किं ब्रह्म प्रतिषिध्यते॰ किं वा नामरूपं प्रतिषिध्यत इति संदेहे

कृत्स्ना नामरूपप्रतिषेधोऽयं न ब्रह्मप्रतिषेध इति सिद्धांतयंति न चायुक्तं संदेहासंभवात्। असंभवे संभवतीत्
वादाद् अस्तीत्येवोपलब्धव्य इति चावधारणात्। सर्वोपनिषत्सु च प्रपंचाकारनिराकरणाद्द्वितीयब्रह्म
प्रतिपादनात्। अस्यामप्युपनिषद्युपक्रमोपसंहारयोर्ब्रह्मणो वस्तुनः नात्। तस्मात्सत्यज्ञानानंतलक्ष
णं ब्रह्मनप्रपंचाकारेणाकारवदिति प्रदर्शनार्थं सूत्रं तत्रैतस्मात्सत्यं ज्ञानमनंतमिति तिभिन्नाकारता
प्राप्नोतीति तन्न सत्यमिति धर्मीव्यपदेशः तस्य चैतन्यं धर्मो न ह्यसतो धर्मयोगः। स चान्योऽप्र
वदव्यतिरिक्तः अन्यथाभावाद्यतिरिच्यते वियदादिविलक्षणं चैतन्यरूपमसाधारणमिति
अनंतोऽस्तीत्यनंतं स्वरूपतो देशतः कालतो वांतवत्त्वं घटस्थितिनभसां तद्विपरीतमनंतमिति
एकमेव वस्तु न धर्मधर्मिभेदेन स्वरूपभेद इति॰ न हि गुणरहितं द्रव्यमस्ति न द्रव्यरहितो गुण इ
ति स्थितिः। न द्रव्यत्वमाह हि। कस्मात् न स्वं न गृह्यते॰ यदस्त द्रव्यकं दुर्विज्ञेयं इति सूत्रमा
ह वन चक्षुषा गृह्यते नापि वाचेति। अपि संराधने प्रत्यक्षानुमानाभ्यां॰ अव्यक्तं वेदनवगते
वस्यात्। नेत्युक्ते। अपि शब्दः संभावनायां संराधनकाले पश्यंति संराधनं भक्तिध्यानादि

भा॰ ८० नेपरिचयः कथंगम्यते श्रुतिस्मृतिभ्यां। श्रु ज्ञानप्रसादेन विशुद्धसत्त्वस्ततस्तु तं पश्यते निष्कलं ध्यायमा
नः। यं विनिद्रा जितश्वासाः पश्यंति सनकादयः। योगिनस्तं प्रपश्यंति भगवंतं सनातनं ॥ प्रकाशादि
वच्चावैशेष्यं ~~प्रतिपद्यते अभिंनः~~ काशश्च कर्मण्यभ्यासात्। यदुक्तः परमात्मानौ द्वियोध्यानयत्नः
ततोन्यत्वं तर्हि जीवस्य प्राप्नोति नेत्युच्यते यथा प्रकाशः सौर्य आदित्यरूपाद् आकाशे वा घटाद्युपा
धिधर्मानुविधायी विगते चोपाधिविशेष्यं प्रतिपद्यते अभिंनः सन्नेवमयं जीवः प्रागप्यभिंनः सन्न
नन्तत्वमपरं रूपं प्रतिपद्यते परस्वरूपप्रकाशाभिव्यक्तिः स च तस्मिन् कर्मण्युपास्ये परमात्मनि संरा
धनाभ्यासान्नान्यथेति सचैवं प्रेस्समाधिर्मंतरेण ब्रह्मप्राप्तावयमिति मन्यंते तेषां मिथ्याभि
मानः स इति सूत्रकारेण सूचितं भवति अथवा संराधनं इत्यधिक्रियते संराधनेकर्मण्यभ्या
सादिति अतोनंतेन तथाहि लिंगः। यस्मादभेदः स्वाभाविकः ततो हेतोरनंतेन परमात्मना
विधूयाविद्याजालमेकत्वं प्रतिपद्यते यतो लिंगं स यो हवैतत् ततस्तु तं पश्यते। निष्कलं ध्या

यमान इति भेदः कर्तृकर्मव्यपदेशादभेदस्तत्त्वमसीति। अहिकुंडलवदिष्टयोः परमात्मा हि स्थानीयः कुंडल
स्थानीयो जीव इति। प्रकाशाश्रयवद्वा तेजस्त्वात्। वाशब्दः प्रकारांतरे यथा सवितुः प्रकाशः तदाश्रयश्च भव
तयोः परस्परं भेदाभेदौ तेजस्त्वसामान्यादेवं जीवपरयोः। पूर्ववद्वा। अहिकुंडलपक्षे जीवस्वरूपानित्यत्व
प्रसक्तिः सवितृप्रकाशपक्षे च आधाराधेयभावः। प्रत्यक्षमुदयास्तमयोश्च तस्मात् प्रकाशादिवच्चावैशेष्यमि
ति। यथा विस्फुलिंगो अग्नितो यथा पंचवृत्तिः प्राणः स्वभावतोभिंनोभिंनेषु बाह्यवायुं च संबध्यते प्रकाशा
दिवच्चेति दृष्टांतेष्वेवं योजनीय इति स्थितं। प्रतिषेधाच्च। नान्योतोस्ति द्रष्टेत्येवमादेः प्रतिषेधादभेद
सिद्धिः। परमतः सेतून्मानसम्बन्धभेदव्यपदेशेभ्यः। सत्यज्ञानानन्तानंदात्मका कारणान्निर्द्धारितय
था तथा ब्रह्मणः परमन्यत्तत्त्वमस्तीति पूर्वपक्षयति। सेतुव्यपदेशात्। अथ य आत्मा स सेतुर्विधृ
तिरिति सलिलविधारणं वस्तु सेतुरिष्यते। यथासेतोः परमस्ति तथा ब्रह्मणोपि। उन्मानव्यपदेशाच्च षोडश
कलं ब्रह्म सुमितं पारार्द्धं न मुच्यते। तथोन्मायमाति सिद्धं लोके संबंधव्यपदेशात्। सता सौम्य तदा
संपंनो भवतीति सचार्थं तस्मिन् सति द्वयोरप्युपपद्यते नैतदेवं तयोरिव भेदव्यपदेशात्॥ ॥

भा० ८० आनात्यदासंभवनोभवतीत्ययएषोरादित्योहिरन्मयःपुरुषोदृश्यतअथायएषोंतरक्षिणीपुरुषोद
श्यतइतिप्रसिद्धभिधीयते।सामान्यात्।तुशब्दःपूर्वपक्षनिरुत्यर्थ्हिनब्रह्मव्यतिरेकंकिंचनकमेवेसेवधार
णात्विधश्चासाद्दृश्यात्सेतुशब्दः।बुद्ध्यर्थःपादवत्।बुद्धिरूपासनातदर्थंउन्मानोपदेशःपादवतद्यथा
मनआकाशवत्।संबंधभेदव्यपदेशाधारुस्मरंसंसोम्यातिसुप्तिस्थानविशेषात्सर्वोपाध्यपस्तमा
वेक्षयासंबंधाश्चांतरादस्यादिस्थानविशेषादेकस्यापिभेदोचारोयथाप्रकाशस्यसलिलगतस्य
उपपत्तेश्च।स्वमपीतोभवतीतिनिर्देशोपपत्तेर्नरजुघटवत्संबंधः।तथान्यप्रतिषेधात्।यथान्याप
उक्तस्तथान्यस्यप्रतिषेधात्।सएवाधस्तात्ब्रह्मैवेदंयस्मात्परंनापरमस्तिकिंचिदितिअनेनसर्वग
तत्वमायामशब्दादिभ्यः।अनेनानंतरोक्तेनन्यायेनसर्वगतत्वंब्रह्मणःसेतुत्वादिव्यपदेशनि
राकरणात्।आयामशब्देभ्योव्याप्तिवचनादित्यर्थः।यावान्वाअयमाकाशःतावानेषोंतर्हृदयआकाशः
आकाशवत्सर्वगतश्चनित्यःपाआ।पादिवोद्यावापृथिव्यावित्यादिग्रहणं।स्फुटमुक्त्वाप्रासंगि
कंसर्वगतत्वंदर्शितंनावयवपक्षापाक्ष।फलमतउपपत्तेः।कर्मफलविधिकारिकामतईश्वरा

भवितुमर्हतिदेशकालाभिज्ञविभागज्ञात्वात्तस्योपपत्तेः।श्रुतत्वाच्च।इतश्चसएवेषमहानजआत्मा
अंनादोवसुदानइतिश्रुतेः।पक्षांतरमुच्यते।धर्मंजैमिनिरतएव।जैमिनिराचार्योधर्मंकर्मफलहेतुं
मन्यतेकस्मात्अतएवश्रुतेरुपपत्तेश्चस्वर्गकामोयजेतेति।इतरथाकर्मोपदेशोनर्थकःस्यात्।यदि
धर्मफलहेतुर्नस्यात्।तथाचोक्तंस्वर्गकामाधिकरणेअसाधकंतुतादर्थ्यादिति।पुरुषपफलस्यता
दर्थ्यात्फलार्थत्वादित्यर्थः।सचसाधितः।फलायाधितोपूर्वमिहउच्यते।पूर्वंतुबादरायणोहेतु
व्यपदेशात्।तुशब्दोवधारणार्थः।सचसाधितः।पूर्वोक्तमीश्वरंहेतुंमन्यतेभगवान्बादरायणःकुतो
हेतुव्यपदेशात्।एषह्येवसाधुकर्मकारयतितंयमेभ्योलोकेभ्यउन्निनीषतइत्यंतस्संनयोमिब्राह्म
रोचाधियज्ञंवानियंतृत्वश्रवणात्सत्येवधर्मेपरमात्मनःकर्मानुरूपफलदातृत्वमुच्यतेइत्यविरोधः
केचित्तुनरांतर्यामिव्यापाराजियोगःसफलहेतुरितिमन्यंतेतन्नदयुक्तंतद्व्यापारस्यनित्यत्वात्स
र्वप्राणिसाधारण्याच्चनकश्चिदाधिकारिणासोनिर्वर्त्यतेनहिनित्यस्यसाध्यत्वमुपपद्यते
सव्यापारेहमयत्नेपुरुषोनियतेतस्मादसमीचीनमिति॥ २॥ तृतीयाध्यायस्यद्वितीयःपादः

सर्ववेदांतप्रत्ययं चोदनाद्यविशेषात्॥ सत्यज्ञानानंतलक्षणं ब्रह्मोपास्यं न प्रपंचाकारविशिष्टमिति स्थितं
इदानीं चिंत्यते किं सर्ववेदांतप्रत्ययमेकं विज्ञानमुत भेद इति॰ ननु चेयं चिंतानुपपन्ना यदा विज्ञेयं ब्रह्म सर्वत्रै
कं तदा नानारूपं विज्ञानमसंधत्ते। कथं भिद्येत न च बहूनि ब्रह्माणि संति॰ येन तज्ज्ञानानि भिद्येरन्। अनग्रापि
वेदांतविज्ञानभेद इत्येका। उपपन्ना नापि चोदनाद्यविशेषादित्य भेदसमर्पनं कर्तव्यं अचोदनालक्षणत्वा
ज्ज्ञानस्य। अत्रोच्यते ज्ञानमोपासनमभिप्रेतं प्रथमं तावद्ब्रह्मस्वरूपविषयं ज्ञानमसंधत्ते तत्र प्रमेय
रूपावच्छेदकं घटादिविषयप्रत्यक्षादि ज्ञानवदिदं तदुपासनं निर्णीतविस्तृतत्वपश्चात्क्रियते यथा गुरुमुपासीत
राजानमुपासीत इति ज्ञातस्वरूपस्य गुर्वादेरुपासनं भवति। तच्च विधिगम्यं यथा चोपासनकावश्यं कर्तव्यं तथा
चतुर्थाध्याये वक्ष्यामः। तस्मादुपपन्नेयं चिंता परविद्याविषया तत्तुल्यत्वात् अत्र पूर्वपक्षवादी मन्यते प्रति
वेदांतं विद्याभेद इति शाखांतराधिकरणपूर्वपक्षवदत्रापि पूर्वपक्षो योजनीयो नामभेदात्कर्मभेदो
यथा ज्योतिरादिवदिति तथात्रापि काठकतैत्तिरीयकवाजसनेयकछांदोग्यमिति रूपभेदात्। कर्म
भेद उक्तः रूपं द्रव्यदेवतं अन्यद्रूपेण कर्मनिरूपणं परिच्छिद्यते तत्रोदाहरणं विश्वेदेवदैवत्या द्व

मिक्षायागाद्वाजिभ्यो वाजिनमिति यागांतरं देवताद्रव्यभेदात्। अस्ति चात्रापि गुणभेदः। पंचाग्निवि
द्यायां वाजसनेयिनः। षष्ठमग्निमामनंति छंदोगाः पुनः पंचमस्तीत्युपलब्धव्यामिति। श्रूयते तेन संख्या
द्यादिवतो रूपभेद उक्तः कारीरीवाक्यान्यधीयाना तैत्तिरीया भूमौ भोजनमाचरंति नापरे अस्ति
चात्रापि धर्मभेदः शिरोव्रतादि पुनरुक्तं च कर्मभेदकं निंद्यादिच प्रतिवेदांतमेकैव विद्या पुनरुक्तो
ता च स्यात्। विद्याभेदे तु न दोष इत्येवं प्राप्ते अभिधीयते॰ सर्ववेदांतप्रत्ययमेकमुपासनं प्रत्ययशब्दः
प्रमाणवाची चोदनाद्यविशेषादिति शाखांतराधिकरणसिद्धांतन्यायोपात्तहेतुचतुष्टयप्रदर्श
नार्थं एकं वा संयोगरूपचोदनाख्याविशेषादिति फलसंयोगः न चाविशिष्टः उपास्यब्रह्मस्वरूप
सर्वत्राविशिष्टं तथा प्राणविद्यायाः प्राणस्वरूपं पंचाग्निविद्यायां पंचाग्निस्वरूपमिति। चोदना
चाविशिष्टा॰ चोदनेति चोदना पुरुषव्यापारः प्रयत्नाख्यः सर्वत्राविशिष्टः अन्ये तु चोदनाश
ब्देन नियोग उच्यत इति नियोगमवतार्य दूषयंति॰ स्वात्मेक्षितं सर्वं नियोगमस्तके ध्यारो
प्य सकलबाह्यप्रपंचप्रविलापयन्ननंतरं च कर्तृभोक्त्रादिरूपं प्रविलापयन्नुपासकस्य ब्रह्म

भा० ८० भावमभिव्यनक्तीति तदुक्तमिति पुरस्तादेवोक्तं एतावांश्च व्यापारकलापः कथं नियोगस्या
चेतनस्यापेक्षित इति नोत्तरं वक्ष्यामस्तत्र पश्यत• समाख्या चाल विद्या पञ्चाग्निविद्या भव
विद्येति एते चतुर्भिर्हेतुभिस्तत्त्वप्रत्यभिज्ञानात्। तत्रैकत्वमितासु प्रतिपत्तिभेदादुक्त उपसं
हारोन्यत्वस्याः शाखाया अध्येतादस्तेषां प्रतिपत्त्यर्थं सैव विद्या पुनः पुनः श्राव्यते (एकस्यां
शाखायां प्रतिपत्तृभेदात्प्रतिप्रकरणं विद्याभेदो वा व्याख्यातः परस्परनिराकांक्षत्वात्। यथा शा
ण्डिल्यविद्योपकोसलविद्या सद्विद्या भूमविद्या दहरविद्येति भेदं नेति चेत्स्यादेकस्यामपि वि
ज्ञानानामेकत्वं गुणभेदान्नोपपद्यते• वाजसनेयिनः षष्ठमपरमग्निरेवाग्निर्भवतीत्यादिना
समामनन्ति• अतो न विद्यैकत्वमित्ययुक्तं तत्परिहर्तव्यमपरवाच्यते• स्यादेकस्यामपि वि
द्यायामेवंविधो भेदाय एकादशद्वादशकपालयोरग्नीषोमीयः प्रोडाशः शाखान्तरेपि वि
नयोः कपालसंख्याभेदेपि अभेदाद्दर्शपूर्णमासयोः सांपादिकाग्निपाठे पञ्चत्वषड्भवत्वा

विशिष्टं। छंदोगा नाम प्रथमोग्निः पठ्यते तेषां तेन हि पञ्चमिनोग्नयः एवं हरंतीति वाजिना माप्यादि षष्ठो
ग्निरेवानुवर्तते प्राणत्वात् न विधीयते अग्नित्वमेकयोक्तं सर्वं यद्यपि षष्ठं न द्येकपादिति शिष्यते• न चाग्नित्व
शून्यं प्राणोपास्यं प्रधानं शशविषाणतुल्यत्वादेकत्वप्रत्यभिज्ञानाच्च अपि च नास्ति कश्चिदुनिराक
रणार्थं तेषु वचनं निकृष्टास्तित्वोपासनार्थं। तथा चैत्तिरीयश्रुतिः असन्नेव स भवत्य
सद्ब्रह्मेति वेद चेदस्ति ब्रह्मेति चेद्वेद सन्तमेनं ततो विदुरिति• प्राणसंवादेपि ते ते प्रजापतिरिति गु
णोपसंहारो नाम प्रतिसंहारो नमस्कं यथनामलाभात्॥ स्वाध्यायस्य तथात्वेन हि समाचारेधिकाराच्च
नियमः। यद्यप्याथर्वणशिरोव्रतं तदपि स्वाध्यायस्य हीति हेतौ यतः तथात्वे अध्ययनांगत्वेन
निमित्तसप्तमी तत्तदंगतया शिरोव्रतं विधीयत इत्यर्थः। समाचारग्रंथेपि इदमपि वेदव्रतत्वेन व्याख्या
तमिति पठ्यते तेन तद्धीर्णव्रताध्येतेति चाधिकारात्। यथा सप्त होमाः शतौदनादयः आथर्व
णिकानामेवैकाग्नावेकाग्नेर्धीयंते नान्येषां तथा व्रतवन्धर्मः तेषामेव। दर्शयति च सर्ववे
दायत्पदमामनंतीत्येवमादि तस्माद्विद्यैकत्वं। उपसंहारोपाभेदाद्विधिशेषवत्समाने चापवे

भा. ८. जनस्त्वं समाने विज्ञाने एकस्यांशस्य वा यमुक्तस्य गुणस्यान्यत्राप्युपसंहारः प्रयोजनाभेदा
त्। यथाग्निहोत्रादिविधिशेषस्य सर्वत्रोपसंहारः। अन्यथात्वं शब्दादिति चेन्नाविशेषात्। तथाहि
मा स्वन्यं प्राण मसृजस्व नउद्गायेति तेभ्य एष प्राण उद्गायदिति वाजसनेयिनः समामनन्ति। छंदो
गाः पुनरथ ह य एवायं मुख्यः प्राणस्तमुद्गीथमुपासांचक्रिर इति तत्र संशयः
किमत्र विद्याभेदः स्यादाहोस्विदेकत्वमिति प्राप्तं पूर्वेण न्यायेन। ननु चान्यथात्वं नानात्वं विद्या
याः कुतः शब्दात्त्वं न उद्गायेति कर्तृत्वं प्राणस्य वाजिनां निर्दिश्यते। अन्यत्र कर्मत्वं तमुद्गीथमिति
चेन्न विभक्तिकृतत्वात्। विशेषाद्भेदो वक्तव्यः तत्रस्यांशस्याविशेषादुद्गीथविद्येति च समाख्या। अविशेषा
त्। न वा प्रकरणभेदात्परोवरीयस्त्वादिवत्। वेति पक्षव्यावृत्तिः। विद्यानानात्वं प्रकरणभेदात्कर्म
भेदात्स्यात्। कथमेकतो ज्ञानक्रियायाः प्राणः कर्ता कीर्त्यते सकला चोद्गीथभक्तिः। तत्राव वाक्षि
तां छांदोग्ये उद्गीथावयवः प्रणवः प्राणदृष्टिविषयः स च वाक्यच्छायासमानतामात्रेणैकविद्यात्वं
यथाभ्युदयेष्टिपशुकामेष्ट्योर्भेदः कर्मभेदात्। यस्य हविर्निरुप्तं पुरस्ताच्चंद्रमा अभ्युदेति स त्रे

धा तण्डुलान्विभजेत्। इति अभ्युदयेनेति भिन्ना सत्येवामावास्यायागः प्रयोगमात्रभेदात्। नोपदिश्यते यः
पशुकामस्याप्सोमावास्याया मिष्टान्तरालान् त्रेधा विभजेदिति। पशुकामेष्टिर्यागान्तरमिष्टेति पूर्व
कर्मसमाप्त्यवगमात् परोवरीयस्त्वादिवत्। आकाशो ह्येवैतेभ्यो ज्यायानाकाशः परायणः स एष परोवरी
यानुद्गीथ इत्यत्र सादित्यहिरण्यश्मश्रुत्वविशिष्टा उद्गीथोपास्तिर्दृश्यते। यश्चनारहं केश्चित्। परोवरी
यस्त्वादीनां गुणानां लक्षणार्थत्वेनाविवक्षितत्वात्। प्रत्येयाभयत्रोपास्यमिति विद्यैकत्वमिति तद्युक्तं
यथा शाखान्तराधिकरणादिभिः कर्मभेदोऽवसीयते तथात्रापि नैरपेक्ष्यात् विद्याभेदो यथा उपकोसलादिविद्यानां च
यथा श्रुतार्थग्रहणासंभवे लक्षणा युक्ता स्वमनीषिकायां तु तरं न वक्तव्यं संज्ञातश्चेत् तदुक्तमस्ति तु तदपि
उद्गीथविद्येति संज्ञातश्चेदेवमुक्तं तदपि परोवरीयस्त्वादिवादादिति प्रकरणभेदात्। संज्ञायाश्च दुर्बलत्वा
द्भवति तु संज्ञैकत्वभेदे यथा द्वादशाहे गवामयने च प्रथममहः प्रायणीयं। व्याप्तेश्च समंजसं। ॐ इत्येतदक्ष
रमुद्गीथमुपासीतेति इहाध्यासापवादपर्यायनिराकरणद्वारेण व्याप्तिर्भाव्यते। अध्यासो नाम प्रतिमादिषु
विष्णुबुद्धिः। अपवादो नाम अहंकारपर्युदासेनात्मोपदेशः। पर्यायो नाम करः पाणिरिति व्याप्तिर्नाम सर्व
त्रावस्थितस्योंकारस्योद्गीथशब्देन विशेषणत्वमिति तत्राध्यासो न घटते। अनवधारणादुद्गीथे परमध्यस्य

भा० र०

तेऽक्षरेवोद्गीथबुद्धिरितिनाध्यक्षरगुद्धान्तबुद्धिर्निवर्त्यते अशक्यस्यादोंकारस्याप्यक्षरत्वानापवर्क्यो
प्रासकृत्वादतःपारिशेष्यान्निहेतोर्विशेष्यतेउद्गीथमक्षरवयवोयःप्राणवस्तमुपासीतेत्यवकृद्भासर्थः
सर्वाभेदादन्यत्रेमे। वाजसनेयिनांछंदोगानांच प्राणसंवादेजेष्ठ्यगुणान्वितस्यप्राणस्योपास्यत्वमुक्तंवागा
दयोपितत्रवशिष्ठत्वादिगुणान्विताउक्तास्तेचगुणाःप्राणेपुनःपुनःसमर्पिताःयथाहं वशिष्ठास्मि त्वं
तद्वशिष्ठोसीत्यादिनाकौषीतकीनांतुप्राणसंवादेवशिष्ठत्वादयोगुणाउक्तावागादीनांनपुनःप्राणेस
मर्पिताःकथमेवंहिसमाम्नातियोहवैज्येष्ठंचश्रेष्ठंचवेदज्येष्ठश्चहवैश्रेष्ठश्चस्वानांभवतिप्राणोवैज्येष्ठश्च श्रे
ष्ठश्चयोहवैवशिष्ठंवेदवशिष्ठोहस्वानांभवतिवाग्वाववशिष्ठःयोहवैप्रतिष्ठांवेद० चक्षुर्वैप्रतिष्ठायोहवैसंपदंवेदश्रोत्रंवैसं
पत्० योहवाआयतनंवेदआयतनंस्वानांभवतिमनोहवाआयतनं० अथहेमादेवताःप्रजापतिं
पितरमेत्याब्रुवन्।कोवैनःश्रेष्ठइतिसहोवाच।प्रजापतिर्यस्मिन्वउत्क्रांतइदंशरीरंपापिष्ठतरमि
वमन्यतेसवैश्रेष्ठइतिसाहवागुच्चक्राम०सायथाऽमूकाअवदंतःप्राणेनपश्यंतश्चक्षुषाशृण्वंतःश्रो
त्रेणध्यायंतोमनसेवमिति।प्राणोहोच्चक्रामतद्यथाश्वःपड्वीशशंकून्संखिदेत् एवमितरान्प्राणान्समखिदत्तेहसमेत्योचुर्भगवन्नेधित्वंनःश्रेष्ठोऽसिमोत्क्रमीरितिसहो

वाचप्राणःकिंमेन्नंभविष्यतीतियत्किंचश्वभ्यआशकुनिभ्यइतिकिंमेवासोभविष्यतीत्यापइतिहोचुस्त
स्माद्वाअयमशिष्यन्पुरस्ताच्चोपरिष्टाच्चाद्भिःपारदधातिनभुकोहास्यभवतिनःअभवसनंभवती
तिनन्वयमर्थःसांशयिकः किंप्राणेवसिष्ठादयोगुणाउपसंहर्तव्याउतनेतिकिंप्राप्तंनत्वानुपसंहा
र्याश्रुतत्वादितिप्राप्तउच्यते० अत्रशाखांतरेवासिष्ठादयोगुणाउपादेयाःकुतःसर्वत्रप्राणविज्ञा
नस्यप्रत्यभिज्ञानान्नचैकंप्रत्ययंशाखांतरेविद्यासर्वशाखासुसर्वफलरूपाधिकारादश्रुततत्त्वमाकिं
चित्करंप्रत्यभिज्ञानप्राप्तिहेतोर्विद्यमानत्वात्।आनंदादयःप्रधानस्य।ब्रह्मणःश्रुतिषुआनंदरूपत्वं
प्रत्यभिज्ञानस्यंदरूपत्वंविज्ञानघनत्वंसर्वज्ञत्वंसर्वात्मकत्वमित्यादयोधर्माःक्वचित्क्वचि
त्क्रियमाणाःप्रधानस्यब्रह्मणःसर्वत्राभेदात्सर्वत्रोपसंहर्तव्याःप्रधानाव्यतिरेकाद्गुणानां
यत्रप्रधानंतत्रतेभवितव्यमितिकिंपुनःपूर्वपक्षाशंकाहेतुःप्रतिवेदांतंवाक्यानांनिराकां
क्षत्वादितिप्रधानस्यसर्वत्रैकादेकादेकांतेनानिराकांक्षत्वमसिद्धमितीसिद्धांतं।यद्येवंप्रि
यशिरस्त्वादयोधर्माःप्राप्नुयुरित्याशंक्याह॥प्रियशिरस्त्वाद्यप्राप्तिरुपचयापचयौहिभेदे॥

भा· ९८·

प्रियं मोदः प्रमोदइत्येषामेवप्राप्तिः कुतः योतो भेदासिस्यातामुप चयाप चयौ विषय कृतौ । प्रियादयः परस्प
रं भिन्नाः सातिशयेत्युपमोत्तरुपपद्यते । नाभिन्नोब्रह्मणि तथाभिप्रायोव्याख्यानं वाक्यानामिदानंदमयाधिकर
णप्रियादिसंकीर्णनं परात्मनः प्रकृतानंदस्यानंदमात्रं अल्पमसंभागमित्यल्पमुपजीव्यतिप्रदर्शनार्थं
नायंब्रह्मधर्मइति । इतरत्वर्थसामान्यात् । प्रियशिरस्त्वादिवदानंदानंदादयोनानुवर्त्तेनइत्याशंक्याहइतरे
तुसर्वब्रह्मस्वरूपस्यब्रह्मणः सामान्याद्भेदादित्यर्थः प्रथमेसूत्रेहेतुर्नदर्शितः प्रियशिरस्त्वादिवैष प्रि
मार्थमनेनसूत्रेणहेतुकथनं कृतमिति अपुनरुक्तता ॥ ९ आध्यानायप्रयोजनाभावात् कठवल्ली
ष्वश्रूयते । इन्द्रियेभ्यः पराह्यर्थाअर्थेभ्यश्च परंमनइत्युपक्रम्य पुरुषान्नपरं किंचित्साकाष्ठासापरा
गतिरिति । तत्रसंदेहः । किमिन्द्रियादीनांप्रत्येकंपरत्वंविवक्षितं अहोस्वित्पुरुषस्यैवपरत्वमाध्या
नायोपदिश्यतइति । तत्रस्वार्थसंभवात्प्रत्येकंपरत्वंप्रतिपद्यतेअर्थभेदाच्चवाक्यभेदइतिपूर्वः
पक्षः फलंच किमपि कल्पमिति सिद्धांतस्तुपुरुषस्यैवपरत्वंप्रतिपाद्यते कस्मादिंद्रियादिपरत्व
प्रतिपादनमाध्यानायाध्यानाच्चप्रयोजनमस्यपरमप्राप्तिः तथाशब्दोनीपरमात्मन्येकीकृत
तएवाहमस्मात्येवंध्यायेत् । आत्मशब्दाच्च । एषसर्वेषुभूतेषुगूढोत्मानप्रकाशते । इत्यध्यात्मज

...सूक्ष्मयासूक्ष्मदर्शिभिरिति । साधनः पारमाप्नोतितद्विष्णोः परमंपदमिति तस्मादिंद्रियादिपर
त्वप्रतिपत्तेः पुरुषस्यपरत्वप्रतिपत्त्यर्थंननिरपेक्षस्वत्वमिति सिद्धं । आत्मगृहीतिरितरवदुत्तरात् । ऐत
रेयके श्रूयते आत्मावाइदमेकएवाग्रआसीन्नान्यत्किंचनमिषत् । सईक्षत लोकान्नुसृजाइति । तत्र
संदेहः किमपरआत्माकं वाकिंवापरइति तत्र लोकसृष्टिश्रवणादपरो हिरण्यगर्भाख्योनिर्दिश्यते
परस्मिन्महाभूतसृष्टिर्निर्दिश्यतेइतिपूर्वः पक्षः सिद्धांतस्तुपरमात्मगृहीतिरितरवद्यथात्मनआका
शः संभूतइति सदेवसोम्येदमग्रआसीदिति कस्मादुत्तरात् विशेषात् । अन्नंपादितिचेत्स्या
दवधारणात् । लोकसृष्ट्यन्वयादपरइतिचेदितिपदकुकर्म कोन्यतेस्यात्परोवाधारणात् आत्मावा
इदमेकएवाग्रआसीदितिसृष्टेः प्रागद्वितीयपरमात्मन्युपपद्यते । हिरण्यगर्भेपुनरेकएवे
त्यवधारणाश्रुतिर्बाध्येत उत्तरत्रमोक्षएवपुरुषं समहुसालुद्वेयादिति । प्रथमजस्यस्रष्टुमा
नत्ववचनात् । सदेवसोम्येदमग्रआसीदित्यत्रात्मगृहणं साधितं ईक्षतेर्नाशब्दमिति प्रसं
गं नाभिधानंयुक्तं । कार्याख्यानादपूर्वं । छंदोगावाजसनेयिनश्चप्राणसंवादेश्वादिमर्या

भा. ८. दं प्राणस्यान्नमाम्नायतस्यैवापो वासआमनंति. तस्माद्वा एतदशिष्यंतः पुरस्ताच्चोपरिष्टाच्चाद्भिः
परिदधातीति. वाजसनेयिने त्वादधातितद्विद्वांसः श्रोत्रिया अशिष्यंत आचामंत्यशित्वाचामं
त्येतदेव तदनमनग्नं कुर्वंतो मन्यंते तस्मादेवंविदशिष्यन्नाचामेत तदेवतदनमनग्नं कुरुत इति तत्रा
चमनमनग्नताचिंतनं च प्राणस्य प्रतीयते. तत्र किमुभयमपि विधीयते. किंवाचमनमेव उत
त्वचिंतनमात्रमिति विचार्यते. किं तावत्प्राप्तमुभयं विधीयत इति ननु भोजनकाले स्मृतितः प्राप्त
माचमनं सत्यं प्राप्तमर्थमिदं तु प्राणविद्या कृत्वेनोपदिश्यत इति पूर्वः पक्षः सिद्धांतस्तु यदपूर्व
मप्राप्तं स्मृतितः तदाचमनीयास्वप्सु वासोदर्शनं विधीयते. कस्मात्प्रापीत्याख्यानाद्धरहः कर्त
व्याचमनस्य संकीर्तनात्। न चानेकार्थविधानं कल्पयितुं युक्तं एकवाक्यत्व आशक्तिनिम्य दू
तत्र तावद्दृष्टिविधानं न हि समस्तप्राणिभक्षणमुपासकेन कर्तुं शक्यं प्रतिषेधातिक्रमाच्च त
स्मात् तदर्थादाचमनेऽपि दृष्टिविधानमेवोपस्थितं। परिदधातीति च परिधानचिंतनं युक्तं वच
नं आधास्येदिति. विधिराचमनीयांशुक्तन स्मृता प्रवसायाय दोषः प्राप्याच प्राप्त्योर्थ

वासोदृष्टिः कर्तव्यानाम्नत्वोपस्तरणमसीति भोजनोपक्रमे. समानएवं चाभेदात्। वाजसनेयके ग्निर
हस्येशाण्डिल्यविद्याम्नाता. सत्यं ब्रह्मेत्युपासीताथ खलु क्रतुमयोयं पुरुषः स यावत्क्रतुरयमस्माल्लोकां
त्प्रैति. एवं क्रतुर्हामुं लोकं प्रेत्याभिसंभवति स आत्मानमुपासीत मनोमयं प्राणशरीरं भारूपमाकाशा
त्मानमिति. बृहदारण्यके पुनः साप्यते. मनोमयोयं पुरुषो भाः सत्यः तस्मिन्नंतर्हृदये यथा व्रीहिर्वा
यवो वा स एष सर्वस्य वशी सर्वस्येशानः सर्वस्याधिपतिः सर्वमिदं प्रशास्तीति किं विद्याभेदः किंवा
भेद इति किं तावत्प्राप्तं विद्यैकत्वं वेद्यस्याभेदात्. एवं च गुणोपसंहारः शाखांतरविहितवदग्निर
हस्ये विद्याविधिरारण्यके गुणविधिः सर्वस्येशान इत्येवमादिः ननु मयोदितोपुनः श्रवणमनर्थ
कं अविदितानामेव गुणानां युक्तं अत्रोच्यते अत एव कतीपय विहितगुणासंकीर्तनात्प्रत्यभिज्ञा
नसिद्धिरिति. सम्बंधादेवमन्यत्रापि। बृहदारण्यके सत्यं ब्रह्मेत्युपक्रम्य तद्यत्तत्सत्यमसौ
स आदित्यो य एष एतस्मिन्मण्डले पुरुषो यश्चायं दक्षिणेक्षन्पुरुष इति सत्यस्य ब्रह्मणोधिदै
वतमध्यात्मं चायतनविशेष मुद्दिश्यफले तोउपनिषदौ विधीयेते तस्योपनिषदहरिति अधिदैव
अग्निरहस्ये ताम्भितेहं स्योपनिषदहमिति. विद्यैकत्वादुभयत्र भयत्रेति पूर्वः पक्षः कथं सत्यब्रह्मसंब

३८

भा० ९० धादेवमिति यथा शाण्डिल्यविद्यायां न यामनरादौ लक्षिणाचेत्पर्थः। न वा विशेषात्। न वेति व्यावृत्तिः
नोभयमुभयत्रस्त्राविशेषोपाधित्वात् यथाचार्यस्यासीनस्योक्तो धर्मो गच्छतो न भवति। दर्शयति च।
यत्र स्वाम एकजातीयकस्य दर्शयति चैतस्यैतस्यैव रूपं यदमुष्य रूपमिति स्थानविशेषादप्राप्तं अर्थो
दंतादर्शयति। संभृति द्युव्याप्त्यपि चातः। ब्रह्मज्येष्ठा वीर्या संभृतानि ब्रह्माग्रे ज्येष्ठं दिवमाततान ब्रह्म
भूतानां प्रथमं जज्ञे तेनार्हति ब्रह्मणा स्पर्धितुं कः इत्येवमोनवर्णिकराणायनीयानां खिलेषु संभृति
द्युव्याप्त्यादयो विभूतिजातं आम्नातं तेषामेव शाण्डिल्यविद्या ब्रह्मविद्याः प्रयंते तासु विभूत्युपसंहा
रो विद्याभेदादिशंकापामुत्येतन्नदपि विभूतिजातं नोपसंहर्तव्यं अत एवायतनविशेषात् हृहरादि
धायां हृदयमायातनं शाण्डिल्यविद्यायामपि न देव तत आत्मांतर्हृदय इति। विभूतयः ह्याधिदैविको
न ज्ञाचोच्याध्याधिदैविक्यो विभूतयः स्वपं नेआयो याद्दोव्याख्यानेभ्यो लोकेभ्य एष उ एव भाम नी
रेषा हि सर्वेषु लोकेषु भातीति अत एवान्याभिव्याप्तिरवगम्यते प्रकरणाधीनाधिदैविकी विभूति
रूपादेयानेन रोति। पुरुषविद्यायामपि चेतरेषामनाम्नानात्। आंगिरसानां पुरुषो यज्ञः
कल्पितस्तादिद्धमापुरुषविधाविभक्तसवानत्रयं कल्पयित्वा अशिपिपादीनि च साधनानि यथा

मंत्रप्रयोगस्तथाशुद्धिः फलं सहबोऽशवर्षगतं जातीतैत्तिरीया अपि यज्ञं कल्पयितस्यैवं विदुषो यज्ञ
स्यात्मा यजमानः श्रद्धा पत्नीत्येवमादिनानुवाकेनान्यपुरुषयज्ञं समाख्याविशेषेणोपसंहारप्राप्तावुच्यते पु
रुषविद्यायामपि चायमनुपसंहारो विभिन्नत्वात्। कथमितरेषां तैत्तिरीयाणां ताण्डिवेदनाम्नानादात्माय
जमान इत्यारभ्य पुरुषसंबंधिभिरात्मादिभिर्यज्ञसंपादनमत्यंतविलक्षणं। सर्वत्र च प्रकारभेदा देवो
पासनाभेदः यत्कांश्चिन्तु साधर्म्यं सर्वत्र संभाव्यामत्यसाधनं। तत्फलभेदाच्च पूर्वस्मिन्ननुवाके न्या
सइत्याद्युमनाविष्णोर्ब्रह्मणोऽभिलुपन्यस्य तदुपासकस्य तत्प्राप्तिमुक्त्वा ब्रह्मणो महिमानमिलुपानुष
धुत्केदमाम्नायते। तस्यैवं विदुषो यज्ञस्येति विद्वानेव यतः सामानोपसंहर्तव्या इति। वेधाद्यर्थ
भेदात्। आथर्वणिकानामुपनिषदारंभे मंत्रः सर्वं प्रविध्य हृदयं प्रविध्य धमनीः प्रवृज्य
त्रिधाविपृक्त इत्यादिः ताण्डिनां देवसवितः प्रसव इत्यादि कथनानां तैत्तिरीयाणां च शंनो मित्रः
शं वरुण इत्यादि वाजसनेयिनां प्रवर्ग्यं ब्राह्मणं पव्यकौत्रैवविद्यासूपसंहर्तव्या नेति विचारः
संनिधिपाठान्मंत्राः प्रवर्ग्यादीनि च कर्माणि विद्यागतयोपसंहर्तव्यानीति प्राप्त उच्यते। नैतदे
वं वेधाद्यर्थभेदात्। भिन्ना हीमे र्था भिद्यो न विद्यायामुपयुज्यंते। मंत्रा लिंगेन तु अभिचारकर्मणि वि

३७
३८

संनिधेश्चालिंगस्य बलीयस्त्वात्

भा· न·

नियुज्यंते· न च मंत्राणां मंत्रार्थकल्पनायुक्तासमाख्यानात्प्रवर्ग्ये चाग्निष्टोमे विनियुक्तं वाक्ये नाग्निष्टोमे
प्रवृणक्तीत्यग्निष्टोमः स्वर्गफलार्थो नित्यार्थो वा विनियुक्तः स्वर्गकामो यजेत वसंते वसंत इति चारण्येनू-
च्यत्वा संनिधिपाठः। हानौ तूपायनशब्दशेषत्वात्कुशाछंदःस्तुत्युपगानवत्तदुक्तं। अस्ति ताण्डिनां श्रुतिः
अश्व इव रोमाणि विधूय पापं चंद्र इव राहोर्मुखात्प्रमुच्य धूत्वा शरीरमकृतं कृतात्मा ब्रह्मलोकमभि-
संभवामीति। तथाथर्वणिकानां विद्वान्पुण्यपापे विधूय निरंजनः परमं साम्यमुपैतीति शाट्यायनिनः
पठंति तस्य पुत्रा दायमुपयंति सुहृदः साधुकृत्यां द्विषंतः पापकृत्यामिति कौषीतकिनः सुकृतदुः-
कृते धुनुते तस्य प्रिया ज्ञातयः सुकृतमुपयंत्यप्रिया दुष्कृतामिति तदिह क्वचिद्दुष्कृतयोर्हानिः श्रूय-
ते क्वचित्तयोर्विभागेनाप्रियैः प्रियैश्चोपायनं क्वचित्तूभयं हानमुपायनं च। तद्यत्रोभयं तत्र नास्ति किंचिद्व-
क्तव्यं यत्र तूपायनमेव श्रूयते न हानं तत्रार्थादाक्षिप्यते अन्यथा तदनुपपत्तेः। उपायनं संप्राप्तिकृच्यते
यत्र तु हानमेव श्रूयते तत्रेदं चिंत्यते उपायनमाक्षिप्यते नवेति नेति प्राप्तमश्रुतत्वादिति तत्रोच्यते हा-
नौ तु केवलायामपि श्रुतावुपायनं प्रतिपत्तव्यं हानशेषत्वादुपायनशब्दस्य कौषीतकिरहस्ये तथा-
वगमात्प्रकृतयोश्च पुण्यापुण्ययोः क्वचिदपेक्षायामुपपत्तेस्तेन बंधः धूननं च हानमुच्यते॥

कल्पयन्नामर्हत्वात्तयोः। न चेह छंदोपादानकालवाचिना कुशा वानस्पत्याः स्थ ता मा पातेत्यस्यां निगमे सामान्य-
श्रवणे सति भाल्लविनामौदुंबराः इति विशेषवचनादौदुंबर्यः कुशा गृह्यंते क्वचिद्देवासुरछंदसामविशेष-
प्राप्तौ देवछंदांसि पूर्वाणीति क्रमविशेष आम्नातं तथा षोडशिस्तोत्रे कालाविशेषप्राप्तौ समयाध्युषिते सू-
र्य इत्याश्रियते तथोपगानं सामान्येन श्रुतमृत्विज उपगायंतीति नाध्वर्युरुपगायतीति विशेष आश्रीयते वा-
क्यांतरगतो विशेषो वाक्यांतरे समाश्रयितव्यो वाक्यस्य परिपूरणाय उक्तं बाधलक्षणे अपि तु वाक्यशे-
षः स्यादन्याय्यत्वाद्विकल्पस्य विधीनामेकदेशः स्यादिति एवं सप्तदशाध्यायपातेर्यज्ञः यन्नायंत इ-
त्यस्य वाक्यस्य नानुयाजेष्वयेयजामहं करोतीति शेष इति व्याख्यानं अन्यथा विकल्पः स्यादिति। सांपरा-
ये तर्तव्याभावात्तथाह्यन्ये देवयानेन पथा पर्यंकस्थं ब्रह्माभिप्रस्थितस्याध्वन्येव सुकृतदुष्कृतवियोगं कौषी-
तकिनः समामनंति स एतं देवयानं पंथानमापद्याग्निलोकमागच्छतीत्युपक्रम्य स आगच्छति विरजां न दी
तां मनसैवात्येति तत्सुकृतदुष्कृते धूनुते इति तत्र यथाश्रुतमेवेनहानमिति प्राप्ते उच्यते सांपराये पर-
लोकगमने देहादुत्सर्पणकाले हानं कस्मात् तर्तव्याभावात् नहि नाभ्यामर्द्धपथे प्राप्तव्यमस्ति तस्मात्तोग
वसंनपुण्यपापक्षयः पश्चात्सहितः कथं गम्यते अतो पेन्ये शाट्यायनिनः शाट्यायनिश्च प्रागेव हानं समामनं

भा० ८०

तिरिति छंदतः उभयाविसंकल्पितो योऽहविदुषः शुभसंकल्पायाति तस्य सुकृतानां प्राप्तिं यस्तु द्वेषादाहितमिच्छति तस्य
दुष्कृतांशा स्यात्प्रामाण्यादिति इष्यते। धर्माधर्मव्यवस्थायां तदेव प्रमाणं न युक्तयः क्रमं नेतरथा च समन्त्रवर्णः तेन
कृताद्दकृताद्देनसस्पर्य्यथा देवासः पिपृता स्वस्तये। अकृतं तदकृतमभिप्रेतं। स्मृतिश्च शप्यमानस्य य
त्पापं शपमानं निपतति इत्येवं चैतन्मूलस्मृतिरूपपद्यते। प्रियेषु स्वेषु सुकृतमप्रियेषु च दुष्कृतं। विसृज्य
ध्यानयोगेन ब्रह्माप्येति सनातनमिति उभयोः केशिवत्किमाद्याय निकुत्स्योरविरोधादेवं। गतेरर्थवत्त्वमुभ
यथान्यथा हि विरोधः यद्यपुरायमपि निवर्तते किमर्था गतिरित्याशंक्योच्यते गतेरर्थवत्त्वमुभयथा दुष्कृत
निवृत्या चोभाभ्यां प्रकाराभ्यां यद्यपुण्यमनुवर्तते तत्फलमननुभूय पापहानिः स्यात्तन्नैव तेन मार्गेणाभि
पद्यमाना इमं मानवमावर्तं नावर्तन्त इति अनावृत्ति श्रुतिर्विरोधः स्यात्। अनेन च यथागतस्य अनावृत्तिः
अनुपपत्तिरुक्ता। पुराणः स्तेनैति ब्रह्मवित्तैजसः पुरा पुण्य चेति विद्याकर्मणोः सा गतिर्विशिष्टदेशप्राप्तियुज्य
ज्यते नतराम्।। उपपन्नस्तल्लक्षणार्थोपलब्धेर्लोकवत्। उपपन्नो गत्युपदेशः तल्लक्षणं निर्मितं यस्या
र्थस्य तदात्तिगतिः परामृष्यते तल्लक्षणस्यार्थस्योपलब्धेः। पर्यंकविद्यायां कार्यब्रह्मप्राप्तिः तेन च संवा
दादाश्रयोजनं लिंगशरीरमुक्तस्याव कध्यते। यथालोके करणावतां परस्य तस्य संवादो दृश्यते तथज्ज

तत्पुरुषोऽमानव दरः सामगशिराः अमानवश्चनिर्वक्तव्यः स ब्रह्मविद्वैषयत्रैति ब्रह्म मयो महानाहतत माह केन मेषो
स्यां निनामान्याप्नोति ते प्राणेनेति ब्रूयात् केन नपुंसकानीति मनसेति केन स्त्रीनामानीति वाचेति। तमाह वेरव
लु लोके यं ते सा जितिर्या साब्रह्मणो जितिर्या व्याप्तिस्ता जितिं जयति तां व्याप्तिं व्यश्नुते य एवं वेदेति तद्द्वारेण च परब्रह्म
प्राप्तिमंतरेणालिंगनिवृत्त्यनुपपत्तेः नदीदृष्टांतेन चैवाप्युपपत्तेरत्राधिकरणे व्याख्यातारः केचित्सगुणनिक
ल्पनयाधर्थं पांतिगतेरर्थवत्त्वात् सगुणविद्यायां श्रूयते निर्गुणविद्यायां नास्त्युपयोग इति तच्च तेषामवाचवामिति
फलुत्वात्तन्निराकरणेन प्रतुलप्यते। अनियमः सर्वेषामविरोधः शब्दानुमानाभ्यां। कामुविदुपकोपल विद्या
यां गतिः पठ्यते मधुविद्यायां शाण्डिल्यविद्यायां च न श्रूयते यत्रैव श्रूयते तत्रैव नियम इति प्राप्त उच्यते स्या
दनियमः सर्वाश्रद्धा तपइत्युपासत इति श्रुतेः श्रद्धा तपइति विद्यांतरशालिनोऽनादिश्यते श्रद्धापूर्वकं ता
नं तपइत्युच्यते मोक्षसाधनत्वमुभयोः सामान्यरूपमाश्रित्य तपः शब्दप्रयोगः स्मृतिरपि शुक्लकृष्णे गती
स्वेद्दितिद्वारा स्थानमनुचिंतनार्थं अथवा अनियमदर्शनार्थं तत्र तत्रेयं गतिर्भवतीति अनुचिंतनं च सा
मान्यलब्धं। यावदधिकारमवस्थितिराधिकारिकाणां। विदुषामर्चिरादिना गत्यापवर्ग इत्ययु
क्तं तन्नोपपद्यते पुनरपि देहांतरमुपपद्यते कथं। अपांतरतमो नाम वेदाचार्यो विष्णुरासन्नात् कलिद्वा

परयोः संबंधो व्याख्यासः संबध्यतेति स्मरणात्। एवमन्येषां च वेदविदां वसिष्ठप्रभृतीनां पुनरुत्पत्ते श्रवणात्
नचोत्तरं भिद्यते हृदयग्रंथिः। तद्यो यो देवानां प्रत्यबुध्यत स एव पुनरावर्तत इति च श्रुतेर्विदुषां मुक्तेर्बोधिका
रेलोकानुग्रहार्थव्यापारो भवस्तेषामाधिकारिकाणां व्यासादीनां यावदधिकारमवस्थितिः। दृष्टश्चानुशासना
दनुपयुंनास्वकर्म चारं च फलं तावत्काले न क्षपयित्वा ब्रह्मणा सह ते सर्वे संप्राप्ते प्रतिसंचरे। परस्यांते कृ
तात्मानः प्रविशंति परं पदमिति। नामादिप्रतीकोपासनेषु फले वक्तव्य नार्थमधिकारारंभात्तत् दश्य
कं प्रतीकोपासनानां कर्मवत्समाणंपक्षंतत्वात्। तद्वगतमेवेति अनर्थिकाचिंता प्रायेणाहि गतानुगता
नुगतिको लोको न लोकः सत्याच्यंतक इति अत एव तत्वज्ञानं सुदुर्लभं।। अक्षरधियांत्ववरोधः सा
मान्यतदावाभ्यामौपसदवत्तदुक्तं वाजसनेयिनामेतद्वैतदक्षरं गार्गि ब्राह्मणा अभिवदंत्यस्थूलमन
ण्वह्रस्वमदीर्घमिति तथाथर्वणे अथ परा यया तदक्षरमधिगम्यते यत्तदद्रेश्यमग्राह्यमिति प्रतिषेधबु
द्धीनां च वस्थानन्दत्वादिविद्यासु प्राप्तिः। प्रकरणाच्च शेषादिति प्रतिषिध्यते अक्षराधियासर्वत्रावरो
धः परिग्रहस्यासामान्यात्। प्रपंचरूपपर्युदासस्य सर्वत्र समत्वात्। तद्भावाच्च। तस्य प्रतिपाद्यस्य ब्र
ह्मणः सर्वत्राभावादोपसदवत्। यथा जामदग्न्ये अहीने पुरोडाशिनीषूपसत्सु सामवेदपठितानां अग्ने

वेहोत्रं वेवध्वरस्यपितर वैश्वानरमवसेकं इंद्रियदेवेभ्यो जुहंतां हविः स्वाहेत्येवमादीनां अध्वर्युणा
याजुर्वेदिकेन स्वरेणोपांशुत्वेन प्रयोगः क्रियते। प्रधानवशवर्तित्वाद्गुणानामुपसदश्च याजुर्वेदिका
तदुक्तं शेषलक्षणे गुणमुख्यव्यतिक्रमे तदर्थत्वात्। मुख्येन वेदसंयोग इति विरूपाः पुनराजन्वादयः
पुरस्तान्नियंति नाइति विवेकः। इयदामननात्। द्वा सुपर्णेति मंत्रं पराविद्याधिकारे श्वेताश्वतरा अथर्वणि
काश्च पठंति कठाश्च ऋतं पिबंतौ सुकृतस्य लोक इति विद्याभेदो निर्देशभेदादिति प्राप्ते। नत्वने
विद्यैकत्वमिति इयत् एतावन्मात्रस्याद्वितसंख्यामात्रास्थितस्यैव द्विरूपस्य उभयत्रामननात्।
जीवरूपानुवादेनेश्वररूपप्रतिपादनाविशेषात्। पूर्वत्र यद्यपि यदा पश्यत्यन्यमीशमित्युत्तरमं
त्रादंतरत्वादपियः सेतुरीजानानामक्षरं ब्रह्म यत्परमिति तस्माद्द्विधिकगुणोपसंहारः प्रा
विद्याभेदेन चेयापि वेदांतास्तत्रैवोक्तिन्पादपदविचारेणाक्तानि प्रतिज्ञानन्तेतेषामानदेयः प्रधा
नस्येसेवमादिवचारविरोधः। अंतरा भूतग्रामवत् आन्यनोन्यथाभेदानुपपत्तिरिति चेत्
नोपदेशावत्। यत्साक्षादपरोक्षाद्ब्रह्म य आत्मा सर्वांतर इति द्विः कहोलप्रश्नयोरा
मनात् वाजसनेयिनः न चोपदेश्यभेदस्तिनवैतिर्निना पामेकमेव प्रतिपाद्यं कस्मादात्मनोन्तरा

भा. त. दंनआआंतरतमः। संभवतिभितत्राभवदिति वैधर्म्यंदाहरणंयथाप्रथिव्याआपोंतरतमास्ताभ्यस्तेजइति
तस्मादितितथाच यथाननपोरैक्यंतथानात्रेत्यर्थः तस्मादिहभेदानुपपत्तिरितिचेन्नोपदेशवत् य
थोपदेशः प्रश्नःप्रतिवचनात्मको भिद्यते तथोपदेशप्रभेदेनापिभवितव्यमन्यथोपदेशद्वयापरमा
त्मनःपुनःसर्वापेक्षयासुख्यमेवांतरतमत्वं। अपरायोजनाषष्ठेयथानवकृत्वस्तत्त्वमसीत्यभ्या
सेअन्यदन्यत् प्रतिपर्यायंप्रतिपाद्यंभिद्यते तथाओपस्ते कार्यकरणबुद्धिविज्ञानसंततिव्यतिरि
क्तजीवप्रतिपादनात्मितरत्रतुपरमात्मप्रतिपादनं बद्धैकत्वं तदुपास्योपासकस्यप्रतिपादनप
र्यवसानात्। व्यतिहारोविशेषांतिहीतरवत्। तद्योहंसोसौसोहमित्यादित्यपुरुषमधिकृत्या
मनंत्सैत्तरेयिणः तथाजाबालाःत्वंवाअहमस्मिभगवनोदेवतेअहंवैत्वमसीतिस्वरूपोक्ता
मात्मनश्चितयितव्यं नव्यतिहारइतिपूर्वःपक्षः जीवात्मांतर्यामीश्वरस्यानिष्टप्रसंगादिति
प्राप्तेविधीयते व्यतिहारोव्यक्तव्यःकर्तव्यःद्विरूपादृष्टिःकर्तव्यत्यर्थः यथैतरेयिणःसर्वा
त्मत्वप्राप्त्यतयाश्चिंतनीयास्तथाव्यतिहारोयतोविशेषयन्तिसमाम्नातारः परस्परत्वंमहं
महंचत्वमसीतिपरमात्मभावनायांएकत्वंदृष्टिभवतीति यदुक्तंजीवात्मतातर्यामीश्व

रस्यानिष्टापत्तिरितितन्नाग्निरादोग्नितविस्फुलिंगवत्। उपाधितिरस्कारोपपत्तेरव्यवहं। सैवहिसत्यादयः
वाजसनेयके सयोहैतंमहद्यक्षंप्रथमजंवेद सत्यंब्रह्मेत्यारभ्य यत्रवेदमग्रआसुस्ताआपःसत्यमसृजं
तेति। प्रकृत्यानंतरं श्रूयते तद्यत्तत्सत्यमसौसआदित्योयएषएतस्मिन्मंडलेपुरुषोयश्चायंदक्षिणे
क्षन्पुरुषइत्यादितच पूर्वःपक्षः हेत्वेतेसत्यविद्याफलभेदापूर्वत्रजयतीमांल्लोकाणपरत्रहंतिपा
प्राप्ते प्मानंजहातिचेतिभूमः सैवयापुरस्तात्प्रकृतोहीतिहेतोध्वकृतेसत्यज्ञानात्तद्यत्तत्सत्यमितिचस
र्वनाम्नापरामर्शात्तस्यानविशेषणत्वं। यासैवोपदिश्यतइत्येकविद्यात्वंतस्योपनिषंगांतरोपदेशः
तस्यसतुल्यर्थमिदंफलांतरश्रवणमित्युपनिषदेर्थवादफलसंबंधमाहोदोहवदर्थवादाविधिः श्रेयानि
तिस्थितं। यत्पुनरिमोचसत्यविद्यांछांदोग्येहिरण्यकेशांकृत्यांउद्धियविद्यामुदाहृत्यएकविद्यात्व
मंगीकृत्यसत्यादिगुणानुपसंहार्यामन्यंतेतेप्रकरणाच्छतिंचबाधतेधर्माधिकेतपुरुषविषया
हिसाख्याथभक्तिव्यपाश्रयाच। तत्प्रकरणलाघवआदिमध्यावसानेषुचोऽद्विपकलंव्यापारश्रव
णात्मयमजामितिहिरण्यगर्भ्योपासनानिर्दिश्यते नतुनःपरमात्मविषयमं नहमेयपदेशादिलि
गं। कामादीतरत्रतत्रचायतनादिभ्यः। छांदोग्येयथादिदमस्मिन्ब्रह्मपुरदहरंपुंकम्यापहतपाप्मा

२०

भा॰ ८॰ दयोर्गुणानिर्दिष्टा वाजसनेयके तु कतम आत्मा यो यं विज्ञानमयः प्राणेषु हृद्यंतर्ज्योतिः पुरुषस्तस्मिन्वि
ज्ञानालनः स्वप्नावस्थामुजरस्थां श्च प्राज्ञेनात्मना संपरिष्वक्त इति वर्णयित्वा संसारगतिं च नाविद्या
कर्मणि संमन्वारभेते पूर्वप्रज्ञा चेति तदनंतरमथाकामयमानो यो कामो निष्काम इत्युक्त्वा पापमनस्ति
कोशरीरः प्राणः आत्म ब्रह्मैव ब्रह्मलोक एव सम्राडिति हो वाच स वा एष महानज आत्मा सर्वस्य वशी सर्वस्येशानः सर्वाधि
पतिर्महानज आत्मा अजरो अमर इत्याम्नायते प्रक्रमभेदाद्विधाप्राप्तिरिति अत्रोच्यते कामादिगुणजातं
कामस्तस्य सत्यकामः सत्यसंकल्प इति गुणगणो लक्ष्यते तदितरत्र वाजसनेयके संगृहीतत्वः वशित्वा
दयश्चेतरत्र कस्मादायतनादिसामर्थ्यात् समानं हृदयं आयतनं सेतुत्वं लोकासंभेदनप्रयोजनमित्यैव
परं ब्रह्मोपास्यत्वमुपदिश्यते साहित्वादेतन्नापद्यते यथायोग्यं वेतिनो विना परमात्मत्वात्तु पपत्तेः न सर्वे
स्वरविद्यासगुणैव आनंदादिगुणा नासंसारनिवृत्ति हेतुत्वा मदृश्यमानविस्वादितरत्स्याबामत्वादेनां सगुणावि
शेषः सद्धीयादिगुणा नांद्यधिक चिंतनं नास्तीति निर्णयात्तु ध्याने फलं त्वविशिष्टमंतर्गुणेनैव तोपासनी
तथास्ततीहि निष्कलस्तत्प्राप्तेः सर्वप्राप्तिरिति । आदरादलोपः । छांदोग्ये वैश्वानरविद्यायां तद्यद्भक्तं
प्रथममागच्छेत् । तद्धोमीयं स यां प्रथमामाहुतिं जुहुयात्तां जुहुयात् प्राणाय स्वाहेत्यादिना पंचाहुतयो विहिताः

ताः सं वाक्ये अग्निहोत्रशब्दः श्रूयते य एतदेवं विद्वानग्निहोत्रं जुहोति यथेह क्षुधिता बाला मातरं पर्युपासत एव
सर्वाणि भूतान्यग्निहोत्रमुपासत इति । तस्य भोजनलोपे लोपो यथा लोप इति जाबालानामादरवचनात्
इत्लोप इति पूर्वः पक्षः पूर्वमतिथिभ्योऽश्नीयात् यथा वै स्वयमग्निहोत्रं परस्य जुहुयादेवं तदिति आतिथिभो
जनस्य माधम्यं नं दत्वा स्वामिभोजनं प्रथमं प्रापयति श्रुतिवादरं प्राणाग्निहोत्रे करोति अग्निहोत्रशब्दश्च
धर्मातिदेशार्थो यथा कुण्डपायिनामयने मासमग्निहोत्रं जुहोतीति भोजनलोपे अद्भिः अन्येन वा कर्तव्य
मिति प्राप्तोस्माकं तो भिधीयते उपस्थिते तस्तद्वचनात् उपस्थिते प्राप्ते भोजने अतः प्रथमाहुतौ इत्का प्रा
णाग्निहोत्रं कर्तव्यं कुतस्तद्वचनात् तस्य भोजनार्थस्य द्रव्यस्य होमसंबंधवचनात् भक्तप्रयोजको हो
मो यथा सप्तमं पदमभिगृह्णातीति क्रय प्रयुक्तैकहायनी विषयत्वा स्त सप्तमपदपांसुग्रहणस्याप्रयोज
कत्वमुक्तं । यद्यकर्माप्रयोजकं नयनस्य पदार्थत्वाद्वाति तत्तु वैश्वानरोपासकस्य वा मानकं पूर्वभो
जनमतिसंदेहास्तु तिर्वाधिना भगतं वा नाम धेयमति देशकत्वं सत्यामाकाङ्क्षायां कोनापायंनीय
हो मोत्राग्निहोत्रपदमर्थवादगतं तं वादेशकं कल्पितमत्वात् यथोपदेशयोपपाद्यो नवर्तते
केनचित्सा हृदयेनाभिहितस्तस्मुपपन्नोति लुकं सत्तमे । तन्निर्द्धारणानियमस्तद्दृष्टेः पृथग्ध्यप्रतिबंधः
फलं । सति कर्मणामयथार्था विज्ञानानामित्तदृष्टेनित्यानि यमदर्शनात्तनो भोक्तृते यथैतदेवं वेद यस्त

४०
४१

भा. न. नवेदे नियतः सांगक्रतुफलात् पृथगेवायमनिबंधः फलमुपासनानां कर्मफलस्यैवातिशयोप्रतिबंधो यदेव वि
द्यया करोति श्रद्धयोपनिषदा तदेव वीर्यवत्तरं भवतीति इतरदपि कर्म वीर्यवदेव फलवदित्यर्थः। फलश्रु
तिरर्थवाद इति पूर्वपक्षाशंकाप्रदानं वदेवदुक्तं। वाजसनेयके ध्यात्मं वागादीनां प्राणः श्रेष्ठोवधारितो
धिदैवतमग्न्यादीनां वायुस्तथा छांदोग्ये वायुर्वाव संवर्ग इत्यधिदैवमग्न्यादीनां वायुः संवर्गो अत्राध्या
त्मं वागादीनां प्राण इति यः प्राणः स एवानुरिति वायुप्राणयोरभेदश्रुतेः द्वित्वैकत्वमध्यात्माधिदैवयो
रिति प्राप्तेऽनेन विद्याभेदः स्थानभेदान्नियमा नो वा एनौ द्वौ संवर्गौ वायुरेव देवेषु प्राणः प्राणेष्वि
ति भेदव्यपदेशान्न भवति वं च तत्त्वभेदे पि गुणभेदात् कर्मभेदः प्रदानवत् इंद्राय राज्ञे पुरोडाशमेका
दशकपालं निर्वपेदिंद्रायाधिराजायेंद्राय स्वराज्ञ इति प्रदानभेदः प्रक्षेपनानात्वं तदुक्तं संकर्षेना
नादेवतापृथक्त्वादिति। लिंगभूयस्त्वात्तद्धि बलीयस्तदपि। नेव वेदमग्रे नैव सदासीदिव वा इदम
ग्रेणेवासीत् इतन्मन एवार्चिषु त्रिंशत्सहस्राण्यपश्यदात्मनो मयान्मनश्चितः स्तमनसैवाधी
यंत मनसा चीयंत मनसैवैषु ग्रहा अगृह्यंत मनसास्तुवत मनसाशंसन् यत्किंचिद्यज्ञे कर्म
एवतावान् यावानसौ पूर्वः ते हैते विद्याचित एव तांस्तेनानेवंविदे सर्वदा सर्वाणि भूतानि

विचिन्वंत्यपि स्वपते विद्यया हैवैत एवंविदश्चिता भवंतीति तत्र संशयः किं कर्मांगका अमी अग्नयः किं विद्यामया
इति सिद्धांतं तावदाह लिंगभूयस्त्वात् लिंगं सामर्थ्यं तानि चेमानि भूतानि मनसा संकल्पयंति तेषामेव सा कृ
तिरिति तांस्तेतानेवंविदे सर्वदा सर्वाणि भूतानि चिन्वंत्यपि स्वपते सुषुप्तायैवेत्यर्थः। न हि लिंगं प्रकरणाद्बलीयः
तदप्युक्तं शेषलक्षणे श्रुतिलिंगवाक्यप्रकरणस्थानसमाख्यानां समवाये पारदौर्बल्यमर्थविप्रकर्षादिति पूर्वस्य
बलीयस्त्वमुक्तं अथ पूर्वपक्षः।। पूर्वविकल्पः प्रकरणात् स्यात् क्रियामानसवत्। पूर्वस्येवाग्नेः क्रियामयस्येष्ट
काभिरग्निश्चिन्वत इति विहितस्यायमग्निः कल्पः स्यात् प्रकार इत्यर्थः। यथासौ क्रत्वंगं तथायमपीत्यर्थः
कथं प्रकरणात् क्रियामानसवत् यथाह्यादशाहस्य दशमेहन्यविवाक्ये पृथिव्या पात्रेण समुद्रं रसेन प्राजापत्यं मनो
ग्रहं गृह्णातीति मानसस्य क्रियाक्रत्वंगमेवमत्रापीत्यर्थः। अतिदेशाच्च। षट्त्रिंशत्सहस्राण्यग्नयो
र्काः। तेषामेकैक एव तावान् यावानसौ पूर्व इति क्रियात्वस्य अतिदेशादेवमुक्तं। विद्यैव तु निर्धारणात् तुशब्दः
पक्षव्यावृत्तिरेवकारोवधारणे। विद्यैवेयं मानसी स्वतंत्रा निर्धारणात् ते हैते विद्याचित एवेति। दर्शनाच्च
इतश्च तांस्तेतानेवंविदे सर्वदा सर्वाणि भूतानीति। श्रुत्यादिबलीयस्त्वाच्च। न वा ध्यानप्रकरणात् लिंगादिवा
धात्मपातेषां बलीयस्त्वात् ते हैते विद्याचित एवेति श्रुतेः सर्वदा सर्वाणीति लिंगं न ह्यन्यथा सर्वाणि भूता
न्यस्य विचिन्वंतीति युज्यते। मनोधृतिष्ठं त्वपवर्धनेषु त्रिंशत्सहस्राणीति वचनात् क्रतुः प्रकर्षः तत्र शानेषु संवरे

भा॰ल॰ षट्यंशे होराणि संवत्सरे त्रीणि त्रीणि शतानि । षष्टिश्च षष्ट्यां होरात्राणि भवंतीनहोरात्रसंख्या
मनोवृत्तिकल्पितत्वेव्यपदिश्यते । विद्यायाहि वैतएवं विद्यास्वतो भावंतीतिप्रमाणान्न यं विद्यामय त्र प्रतिपाद
कं एवं हि यहणश्च क्रत्वंगराद्धानिकृत्यादि । अनुबंधादिभ्यः प्रज्ञांतरपृथक्त्ववद्दृष्टश्च तदुक्तं । इतश्च स्वातंत्र्यं
उपदेशात् मन आदिष्वापारेषु किं भावयवानुबंधां मनसैकस्थीनयंतमनसा चीयंतमनसैव ग्रहा अग्रह्यंत क्रत्वंग
त्वे मनस्यारोपणमनर्थकं आदिशब्देन पूर्वोक्तातिदेशो व्यपदिश्यते भेदेयसति देशो विकल्प्येत । प्रज्ञांतरपृ
थक्त्ववद्यथा शांडिल्यविद्याप्रभृतीनि कर्मभ्यो विद्यांतरेभ्यश्च पृथग्भवंति एवं नो दृष्टश्चाक्रर्षोवधेराज
सूयप्रकरणे पठितायाः तदुक्तं भेदलक्षणे । अवेष्टौ यज्ञसंयोगात्क्रतुप्रधानमुच्यते इति यद्ब्राह्मणो
यजेत बृहस्पतिसवेन यजेत बृहस्पतिसवे पुरा यज्ञे तया अन्नाद्यकामं याजयेदिति । नसामान्याद्यपलब्धेर्मृत्युवन्नाहलोका
पत्तिः न मानसग्रहसामान्यादपि मनश्चिदादीनां क्रियांगत्वं केवलपुरुषार्थोपलब्धेः । एवं सिन्नराउलबा
लण समाप्तो समएव एवमृत्युर्यं एव एतस्मिन्मरा उले पुरुषायं दक्षिणेक्षन्पुरुष एवं वेद आलाभवतीत्यो
मृतो भवतीति मृत्युरस्यात्मा भवतीति तदेवाक्रांक्षा संनिधियोग्यतावशेन संबध्यते सामान्यफलं चो
न तरन्नश्च प्रमाणं विद्ययातदारोहंति यत्र कामाः परागताः । न तत्र दक्षिणा यंति नाविद्वांसस्तपस्विनइति
नाहि फलमंतरेण विधिः समाप्यते न तदुक्तं चतुर्थोभृत्पकदेशः स इति चनमानसग्रहसामान्यात्क्रियांगत्वेना

हिश्चितश्चित्सादृश्यं कस्यचिं नास्ति मृत्युवत् यथा सएव मृत्युर्यं एषएतस्मिन्मराउले पुरुषइति । अग्नि
र्वै मृत्युरादित्यपुरुषयोर्न सादृश्यादि कनास्ति यथा चासौ वा वलोकोगौतमाग्निरिति न लोकत्वेनलोकापत्तिः
वैक स्य चान्यापत्तिः परेपाचराद्ध्यस्याहिल्यतादिध्य रूपत्वान्न नु बंधः परस्तादप्यर्थं वा च लोकत्वोपि
चित्स्यनंतरे लोकेकृत्वा ब्राह्मणे चाहि यं वि विद्याविरहस्य प्रयोजनं लक्ष्यतेन ब्राह्मविद्यया तदा
रोहं तीति विद्यामात्रस्यास्य दर्शितं न सामान्यादिह्यपि विद्याविधित्वं भूपास्व पवाः । संप्रलापितवा
विद्यायामित्यत्र न कालकारणदृष्टि न तु बध्यते विनैकर्मांगत्वात् । तस्मान्मनश्चिदादीनांविद्यात्म
कमिति । एकआत्मनः शरीरेभावात् । मनश्चिदादयो विद्यात्मिकाः पुरुषार्थाइत्यनंतरमुक्तं एको
ऽभुक्तो यदसूत्र परलोकफलविधयइति । तत्प्रसाधनार्थं आरभ्यते । तत्रात्मनो भावमेके लोकाय
तिका मन्यंते ऽतः धर्मविसाति चैतन्यस्याभावात् असति चाभावान्न धर्मश्चैतन्यं शरीरादिकार्य प्रत्येकाने
श्यो भूतेभ्यश्चैतन्य सृप्त पत्नइति याबाह्य स्यत्यानिरत्रापिद्राधिव्या तेजो वायुरितितत्वानितत्सप्रातमेव
शरीरेंद्रियविषयसंज्ञानेभ्यश्चैतन्यं कण्वादिभ्योमदशक्तिवद्विज्ञानमिति अन्वयिव्यतिरेकातिरेकत्वा
भावस्याविलासयूपफलविवत्। तथाहुः पृथिव्याप्यस्तेजोवायुरिति शरीरधर्मश्च तन्यं तत्त्वोक्तव्यतिरेकैतस्य

३

भा. ट.

स धर्मश्चैतन्यमिति येन पदार्थानानिभूतानुपलभ्यंते सतेभ्यो व्यतिरिक्त तदुपलब्धा वश्यमभ्युपगंतव्या न ह्युप
लभ्याः घटादिरेवोपलब्धा या च हीन्द्रियार्थसन्निकर्षानुभवात् उपलब्धिवत् यथोपलब्धदन्योपलब्धिः साक्षादनुप
पत्तेः अपरोक्षत्वादेवं चेनउपलब्ध्या प्रपरोक्षएवउपलब्ध्या उपलब्धिश्चनित्यं प्रत्यक्षं उपलब्धानादस्य
प्रसिद्धः प्रमाणप्रमेयं च न तस्यापि स्वप्रमत्वेन न तास्ते वै हि लोकः स्वमात्मानं प्रत्यभिज्ञानाति जायन्त मनुष्
त्वाव स्था नपव्यतिरिक्तं सोहमित्यनुसंधत्ते यत्त्व मात्मानं निराकरोति किं अहमस्मीति प्रत्येषि किं वा
नेति यदि न प्रत्येषि को वा निराकर्ता अथ प्रत्येषि त्वमेवासौ निराक्रियमाणः स्थानात्मत्वानत्वप्रभावप्र
त्ययः प्रमातर्यात्मस्य दूरं लपते अभावज्ञानस्यापि प्रमातारमनाश्रित्यानुपपत्तेः प्रमेयो हि घटादावस्तिना
स्तिप्रत्ययः प्रमातर्यात्मस्य द्वंद्व मत्सपर्यायेण प्रवर्तेत न च शरीरधर्मस्तत इमे वै धर्म्यात यो हि शरीरध
र्मास्रूपादयः नेषा द्वावभावित्वात् शरीरभावित्वात् शरीरभावित्वान्मतशरीरेष्वनुवृत्तेरन्यावत्
शरीरभावित्वे चैतन्यं धर्मस्याहहि धानि प्रतित्वाधारविनाशाद्वा विरुद्धधर्मसमोदृशा द्वपचाध्यासस्य कु
त्र स्वरक्तगुणयोगानिवृत्तिः । ननु चैतन्यं तत्रापि विरुद्धं धर्मांतरं । अत्रोच्यते । प्रायेणाश्रकृतानां ज
लापरित्यागः पारिजल्यकादर्णासति शरीरे चैतन्याभावः कथमिति यदि छेस एव चैतन्याभावो हेतुरुपादि
श्यते स पानि हिसाध्य एव हेतुर्भवति न हि श्यामत्वाभावः । श्यामत्वनिवृत्तौ हेतुः किंतु गुणांतरं न चाचेत

न्यं नाम कश्चिद् गुणांतरमस्ति चतुरचकाकैः स्यादिवर्षास त्यपि न हर्मो सं न तन्त्र उक्तं मृदुत्व स्थूलत्वादीनां निवृत्ति हेतुत्वात् किंच
देशरीरसम बोधित्वेन प्रलभ्यासंते रूपादयस्तेन हर्मा भवंतु संवेदनमात्मनर्थ्याधिचैतन्ये तत्समवायित्वे न प्रद्युते चेत
न्यलिपा छशरीरे या त्वयाभ्युपगम्यमानेन चैतन्यं कल्प्यितव्यं गहीतत्वेन न तस्या प्यन्यमित्यन व स्थेति व्यतिरेको बलासा
प द्युते चैतन्य व्यहरीरे न संभवतीति भौतिकत्वात् कुम्भादिवदिताहि नलस्रूक्तिनिवृत्त संभवाद्चैतन्यं कुम्भादीनामसत्त्व
दादिवत् अगम्या चोक्तां तिगस्यागति प्रतिपादनत् व्यतिरिक्तत्वं नित्यत्वं चैवं प्रमाणत्रयसिद्धं । ननु कमात्मायं तु शरीर
भावादिति तत्र व्यतिरेको सिद्धः शरीराभावे तदभावः हेतु भावादिति स्थितं मशक्तिवादि संयुक्तं दृष्टाभिधानं वैधर्म्या
दृष्टांत स्यादिदं शक्तिर्भवति राजद्वारशक्तिरग्नेर्हि दहशक्तिरिति यदि शरीरव्यतिरेके णापरिणामस्य वा चैतन्य शक्ति
र्दृष्टे तनो दृष्टांतोयुक्तः नदृष्यावादु कायकार्यं चैतन्यमिति प्रतिरेकणपरिणामस्य चैतन्यशक्तिर्दृष्टेततो हृष्टांतो युक्तः
तदभावाभावात् कायकार्यं चैतन्यमिति प्रतिज्ञामात्रमिति । अंगावबद्धास्तु न शाखासु हि प्रतिवेदं । उमित्येत इत्युद
गीथमुपासीतलोके षु पंचविधं सामोपासीत उक्तमुक्थमिति वै प्रजा दृतिरिदमेव मेवो क्थमयं वालोक इत्येवमा
दिन इत्येव मा द्याः प्रतिवेदं शाखासु प्रत्यविधा यमानाव्यवतिष्ठेरन् । येन स्वरादिविशेषेणाय स्यां शाखायां उद्गी
थादयः अयते तद्विशिष्टा एव भवेयुर्न शाखांतरगतो द्गीथाद्याश्रयाः संनिधानादिः । निमानेब्रूमः । उद्गीथाद्य
वबद्धाः प्रत्ययाः न प्रतिवेदं किंतु सर्वशाखास्वविहिताः स्युः यस्मादुद्गीथाद्यश्रुतिरविशिष्टसंनिधिं बाधते न तुम ध्यम

गतारेवो ध्रीयादय: प्रत्यक्षप्रधानतत्वसंनिधिकोप: सर्वशाखाप्रत्ययत्वाक्रांतो:। मंत्रादिवद्वा विरोध:। चोर्थवाशब्दोय
सा· ९८· याशाखांतरविहितो। मंत्र: कूटरूक्समितिशाखांतरे छपेक्षते: कुकु ये सोमेस्वशमानमादस्ते कुटरूकसीतवेति· मैत्रायणी
या· प्रयक्षानसंनितत्वाप्यनुद्रुतगुणा विधिर्भवति: समानत्वं त्रहोतव्या इत्यादियहणं। भूम्न: कुकतुवदं आवेस्त
उपक्रमोपसंहारयोरेकवाक्यत्वात् तथा च दर्शयति। वैश्वानरविद्यायां छांदोग्ये कि समस्तोपासनं कर्तव्यं अथ व्यस्तो
पासनं कर्तव्यं अथ व्यस्तोपासनमपीति दिवमेवभगवो राजंनिति होवाचोत प्रत्येकश्रुते: फलसंकीर्तनाच व्यस्तोपाने स
प्राप्ताबुच्यते भूम्न: समस्तोपासनमस्यापसंप्रशस्ता प्रमाणवत्वं कथमुपक्रमोपसंहारयोरेकवाक्यत्वात् यथा वै
श्वानरं द्वादशकपालं निर्वपेत्पुत्रे जाते इति मूर्धाने व्यपति षादिनिदोषदर्शनात्क्रतुवत् यथा पौर्णमासादीनां सांगा
नामेक: प्रयोग: फलाय श्रुतिश्चभवति यथान्यायउक्तो क्रमाति: न धा व्यस्तोपानं श्रावत्संसमस्तोपासनत्वमेवानुकृत्य
समर्थचुलोकेषु सर्वेषु सर्वेषु सर्वेष्वात्मस्वंनमतीति। नानाशब्दादिभेदात्। शाण्डिल्यविद्यादीनामपि समुच्चित्यो
पासनं न्यायोनंतरन्यायेन यथा ग्निहोत्रादीनां समुच्चित्यप्रयोग: तथा चापीति प्राप्ते उच्यते नानेति भेदे नोपास
नं कर्तव्यं न समुच्चित्य प्रतिकरणमुपासना विधिनामन्योन्यानिराकांक्षत्वाच्छब्दात् कथं शब्दादिभेदात् शब्दांतरा
२ भ्यांस संख्यासंज्ञागुणप्रकरणानि कर्मभेदप्रमाणानि भेदलक्षणे दर्शितानि· नैरेवात्रापि भेदसिद्धेर्वेपासीत स
कतुं कुर्वीतेति· स्वपाभेदे पि विधेयस्यानुरूपफलस्य गोयाफलादवंधा ~~नंतदेवसकमंतत्संप्रसादनादभ्याधी~~

न चम्बरूपभिदयते यथोद्भिदाज्योमादिनाम्। विकल्पो विशिष्टफलत्वात् किमासां विद्यासु फलार्थिनां समुच्चयेन प्रयोगो
ग्निहोत्रादिवद्यथा विकल्पेन इति समुच्चयो ग्निहोत्रादिवदिति पूर्व: पक्ष: विकल्प इति सिद्धांत: कस्मादविशिष्टफल
त्वाद्पवर्गप्राप्तिरेकफलमेकार्थास्तु विकल्पेरन्नितिन्यायाद्यथा व्रीहियवयोर्यागं प्रतिनिवृत्तिरेकं कार्यमन्योन्यानर्पे
क्षसाधनभावोपदेशात्काममसमुच्चियेरन् वा पूर्वहेत्वभावात्। प्रत्युदाहरणसूत्रं स यो नाम ब्रह्मेत्युपास्ते यावन्नाम्नो गतं
तत्रास्य यथाकामचारो भवति स य एतमेवं वायुं दिशां वत्सं वेद न पुत्ररोदनं रोदितीति· काम्या स्तु यथाकामं यथाफलं
वांछनि फलानि यथार्थयन्तेतत्प्राप्तये समुच्चयेन वा: यद्येकं फलमिच्छति तदेकमेव कुर्यादिति आनिपम: पूर्वोक्तहेत्वभा
वादिति अंगेषु यथाश्रयभाव:। कर्मांगेषु उद्गीथादिषु यथाश्रयभाव: प्रत्ययानां ते न तेन वेदेन विहिता तां यथाश्र
यास्तो च शक्त्वाद् यो नित्यास्तथा तपाश्रिता अपि नित्या इत्यर्थ:। शिष्टेश्च। इतश्च यथा स्तोत्रादीनां शिष्टि: शासनं विधा
नं तथा प्रत्ययानां। समाहारात्। होतृषदनाद्धैवापि दुरुद्गीथमनुसमाहरतीति· य: प्रणव: स उद्गीथ इत्येकत्वावि
ज्ञानसामर्थ्यात् उद्गातास्तोत्रे वैगुण्यं समुत्पन्नं होतृकर्मणा शंसनात्समादधातीति समुच्चयं दर्शयति। गुणसाधा
रण्यश्रुतेश्च। इतश्च ज्ञानविद्या गुणस्योंकारस्य वेदत्रयसाधारण्यश्रवणात्। ओमित्याश्रावयत्योमिति शंसत्योमित्युद्गा
यतीति तदाश्रितस्य प्रत्ययस्य साधारण्यमित्यभिप्राय:। ननु पुनरुक्तमेतन्न निरस्तानियतोंगभाव: तद्यथा: प्रतिबंध:
फलमित्यनेन तदेवाक्षिप्यते कथमाश्रयासंबंधात्स्वातंत्र्यं विधेयस्यात्। अन्यथा बहिरपि प्रयोग: स्यात्तथ

प्रयोगवचनेनाश्रयवदाश्रितस्योपादानां नित्यप्रयोगियस्य कृत्विजोप्युपासनमुक्तं तत्तेन कर्तव्यं। अंगानरवत्प्रयो
भा. ८. गवचनोपादानाविशेषात्। यथा यस्य पर्णमयी जुहूर्भवति न स पापं श्लोकं शृणोति। तत्राश्रयसंबंधो वर्ग्यं भवति
कृत्वर्थता। अत्र त्वनुवाक्यांतरेणाग्रहोपासनविधेरेतिफलस्य विधानात्तदपि भवतिस्युच्यते। नाश्रयसंबंधोत्र विधातव्यः
प्रयुज्यमानो ह्युद्गीथाद्युशेनमनो वृत्तिमात्रविधानानचो ह्युद्गीथादयः क्रतोर्बहिर्विधातैर्नैमित्तिकत्वात् अर्थवर्या दिवत्
अधिकृताधिकारित्वासिद्धं गोदोहनादिवद्यथा तथा ग्रहणयथामाश्रितस्य गोदोहनं फलं साधयतीति प्रयोगवचनस्या
ध्योपादानसामर्थ्यात्। आश्रयत्वासिद्धेरेवमत्रापि पर्णमयीवाक्ये तु जुहूसंबंधस्यावश्यमाविततान्तत्संबंधः पूर्वविधानस्य
३ इति फलश्रुतेरर्थवादः अन्यथा वाक्यभेदप्रसंगादिह तु वाक्यांतरे स्ववाक्ये वा यत्फलमुक्तं तदेव तत्क्रमांतरंगत्वादनन्य
स्याधीनत्वाच्चेति नदेवस्थितं पृथक्त्वप्रतिबंधः फलमिति तदेतदुच्यते। न वा तत्सहभावाश्रुतेः। न चेति वायुविः
नप्रत्ययाः स्तोत्रादिप्रयोगवचनेनोपसंहर्तव्याः स्तोत्रादिसहभावाश्रुतेः। प्रत्ययानां कृत्वर्थत्वात्। स्वांगानामुपसंहा
रं करोति ज्योतिष्टोमादिविधिः पुरुषार्थास्तु प्रत्यया इति वैषम्यं अत एवावश्यकर्तव्यताभावात्प्रत्ययाः कल्पसूत्र
त्रकारैर्न निबद्धाः दर्शनाच्च। इतश्च प्रत्ययानामतत्सहभावो दर्शनादेवंविद्धे ह वै ब्रह्मा यज्ञं यजमानं सर्वांश्चर्त्विजो
ऽभिरक्षतीति ब्रह्मणो विदुषः पालनं श्रुतम् प्रसंगाभिमतानां दर्शयति॥ इति तृतीयाध्यायस्य तृतीयः पादः॥३॥
पुरुषार्थोऽतः शब्दादिति बादरायणः। पुरुषस्य प्रयोजनं ब्रह्मप्राप्तिरतो ब्रह्मज्ञानात्पुरुषः प्रमाणान्तरशब्दादिति

शब्दोवधारणार्थः। सम्यक्ज्ञानं पुरुषार्थमेव ननन्त। कृत्वर्थमिति मेवगभवान् बादरायणो मन्यते स्माकः पुनः
शब्दः तरति शोकमात्मवित् स यो ह वै तत्परमं ब्रह्म वेद ब्रह्मैव भवति। ब्रह्मविदाप्नोति परं स वा एष लोकानाप्नोतीति
अत्र पूर्वः पक्षः प्रारभ्यते। यद्येवं किमर्थः सिद्धांतोपक्रमः किं वात्र प्रतिपाद्यमिति वक्तव्यं मुख्यत्वेन सर्वत्रासिद्धां
तोपक्रमस्य दृष्टागतिः पूर्वपक्षविघटनार्थं तस्य वादो वैलक्षण्यप्रकटनार्थं सिद्धांतहेतुशंका। तन्निरासेन प्र
त्यवस्थानोपपत्तेः आत्मज्ञानं कर्मांगं प्रतिश्रवणं च स्तुतिमात्रमैकाग्र्यं श्रोतव्यात्मांतरं स्मार्तं विकल्पे द्वया
दित्वविषयचरितार्थमिति पूर्वमीमांसकमतं तदत्र निरस्य नास्ति तेनास्ति पुरुषार्थे ज्ञाने कर्मसमुच्चितात्सतः सिद्धिरिति
मतान्तरेति स्ववादित्वं द्युतिः तदेतदधिकरणतात्पर्यं। अन्ये केवलादेव ज्ञानादात्मैव पुरुषार्थसिद्धिः प्रतिपाद्यत इति
मन्यंते तात्पर्यपरिज्ञानात्॥ शेषत्वात्पुरुषार्थवादो यथान्येष्विति जैमिनिः। कर्मशेषत्वात्कर्तुरात्मनः तत्सद्भाव
ज्ञापनेनोपनिषदां कर्मोपयोगित्वं। लौकिके पुनर्व्यवहारे नास्ति तत्सद्भावयोगः सर्वस्योपपन्नेः फलश्रुतिरर्थवादो
यथा यस्य पर्णमयी जुहूर्भवति न स पापं श्लोकं शृणोति यदंक्ते चक्षुरेव भ्रातृव्यस्य वृङ्क्ते प्रयाजानुयाजा इत्यत्र कर्मसु जाता
नन्याधातव्यस्याभिमतस्येति जैमिनिराचार्यो मन्यते स्म॥ आचारदर्शनात्। ब्रह्मविदामप्याचारदर्शनात्
जनको ह वैदेहो बहुदक्षिणेन यज्ञेन यजते। तत्कुतः कर्मशेषत्वं न श्रवणात्। यदेव विद्यया करोति श्रद्धयोपनिष
दा तदेव वीर्यवत्तरं भवतीति। समन्वारम्भणात्। तं विद्याकर्मणी समन्वारभेते इति। तद्वतो विधानात्। विद्याव
तः कर्मविधानात् आचार्यकुलाद्वेदमधीत्य यथाविधानं गुरोः कर्मातिशेषेणाभिसमावृत्य कुटुंबे शु

भा. ७८· चोदेशोऽस्वाध्यायमधीयानइति। अर्थाववोधपर्यंतः स्वाध्यायविधिरिति [illegible]पितं॥ नियमाच्च॥ इतश्च। कुर्वन्नेवेह कर्मा
णिजिअधिकोपदेशात्तु बादरायणस्यैवं तद्दर्शनात्। तुशब्दः पक्षव्याहृत्यर्थः। कर्तृभ्योऽसस्वरूपात्। संसारिणोऽधि
वादधिकोऽसंसारी ईश्वरः। समस्तप्रपंचधर्मारहितो अद्वितीयः सत्यज्ञानानन्दलक्षणस्तस्य सर्ववेदांतेषूप
देशात्। तज्ज्ञानस्य कर्मानुपयोगात्। प्रकरणाद्यभावाच्च कर्मांगत्वं कस्यापि तु मशास्य फलवत्संनिधावफलं तदं
गंप्रयाजवत्। आत्मज्ञानं तु स्वप्रकरणगतेनैव फलेन निराकांक्षं नान्यशेषत्वं प्रतिपद्यते। स्थितमेवं पुरुषार्थोऽत इ
तिबादरायणस्य मतं तद्दर्शनात्। यः सर्वज्ञः सर्वविदिति। तु त्यज्य दर्शनं। अकर्मांगत्वेप्यस्तात्पर्यः। तद्धस्मैतद्विद्वां
स आहुर्ऋषयः कावषेयाः किमर्था वयमध्येष्यामहे किमर्था वयं यक्ष्यामहे। एवं वै तमात्मानं विदित्वा ब्राह्मणाः
पुत्रैषणायाश्च वित्तैषणायाश्च व्युत्थायाथ भिक्षाचर्यं चरंतीत्याकमर्थ। वयमितिसंहितादिज्ञानः स्फुटार्थं नाध्या
पनादत्यागविधानं सर्वथा ज्ञानस्य प्राधान्यमभिप्रेतं। असार्वत्रिकी देवादि ध्येपति श्रुतिः सर्वं न त्यागसंगविस्स
बंधात्। उद्गीथोपासनायाः कर्मांगत्वमेव। विभागः शतवत्। विद्याकर्मणी आरभेते कर्मान्यमितविभागः न
प्राप्यनंगत्वमात्रप्रदर्शनविवक्षयोपन्यस्तमिति द्रष्टव्यं। अध्ययनमात्रवतः। अध्ययनपतदा स्थिते कर्म ज्ञान
वतोध्ययनस्य ज्ञानार्थत्वात्। तेन च कर्माधिकारोपपत्तेः कर्मांगेनात्मज्ञानमित्यभिप्रायः। नाविशेषात्। विदु
षोविदुषश्चाविशेषात्कुर्वन्नेवेति। स्तुतयेनुमतेर्वा। पूर्वत्रापादितोपाहारांतरं प्रस्तावात्। विद्यास्तुतयेनुमतिः क श्री
र्मानुज्ञा क्रियते। न कर्म लिप्यते नर इत्यनेनापि संबंधात्। ज्ञानस्येत्यत्। सामर्थ्यं प्राप्य ज्ञानी वं कर्म कुर्वति विदुषन

न्मेषोपलब्धोतीति। कामकारेण चैके। अपि चैके शाखिनो विद्वत्प्रभिक्षानुरोधेन प्रजादिभ्यस्त्यागमामनंति किं प्रज
याकरिष्यामो येषां नोयमात्मायं लोक इति विद्याप्राधान्यं दर्शयति। उपमर्दं च। यत्र त्वस्य सर्वमात्मैवाभूत्तत्केन
कं पश्येदिति आत्मस्वरूपस्य स्वविषयेंद्रियजसमस्तसांसारिकद्वैतोपमर्दमामनंतीत्यर्थः। अतो न कर्मांगः
कुतश्चाध्र्वरेतः हि। इतश्च विद्यायाः स्वातंत्र्यं। नाग्निहोत्रांगता कथमूर्ध्वरेतःसु निवृत्तत्वात्। ऊर्ध्वरेतःस्वाश्रमेषु श्रूयते
यतः सोचाश्रमावेदके शब्देभ्यस्तं त्रयो धर्मस्कंधाः। ये चेमेऽरण्ये श्रद्धा तप इत्युपासते। एतमेव प्रव्राजिनो लोकमिच्छंतः
प्रव्रजंतीति। परामर्शं जैमिनिरचोदना चापवदति हि। त्रयो धर्मस्कंधा इति स्मृतिप्रसिद्धानामाश्रमाणां श्रामो
सनविधिप्रकरणे तावमानेनतोपरूष्यस्वतंत्रस्य प्रणवोधासनस्य स्तुत्यर्थं परामर्शमनुवादं जैमिनिराचार्यो मन्य
ते नतेषां विधानं कस्माच्चोदनाविधायकशब्दाभावात्। अपवदति च वीरहा वा एष देवानां योऽग्निमुद्वा
सयते। आचार्याय प्रियं धनमाहृत्य प्रजातंतुं मा व्यवच्छेत्सीरिति। अनुष्ठेयं बादरायणः साम्यश्रुतेः। अनुष्ठेयमा
श्रमांतरं बादरायण आचार्यो मन्यते स्म गार्हस्थ्येन तुल्यं श्रवणादाश्रमांतरस्य त्रयो धर्मस्कंधा इत्यत्र वादा यस्य
नीनां श्रुतिमूलत्वात् सिद्धं। विधिर्वा धारणवत्। अथवा परामर्शमात्रमाश्रमांतराणां किं तर्हि विधिः कस्मात् पुनः प्र
वृत्तेवैकवाक्यतां भित्वा विधिरूपगम्यते अन्यतः अपि दर्शसंभवात् धारणवत्। यथा दर्शं गनाग्निहोत्रे श्रूयते
अधस्तात्समिधं धारयन्ननुद्रवेदुपरि हि देवेभ्यो धारयतीति भिन्नमत्र ऊर्ध्वधारणमपूर्वत्वाद्विधीयते। ननु
शेषलक्षणे। विधिस्तु धारणे अपूर्वत्वादित्यत्र तृतीयाधिकरणप्रदेशो अनुवादो वा विधिर्वास्तु सर्वथास्त्याश्रम

भा॰ त॰

भिक्षुस्तज्ज्ञानानिनैकाश्रम्यनेत्यभिप्रायः। नपुनर्वाक्यभेद एवैकांतेन विवक्षित इति केचिद्वदुः। ब्रह्मसंस्थ इ
ति परिव्राजको निर्दिश्यते। पारिशेष्यं तप एव सत्र वैखानसो गृह्यते तस्य तपः प्राधान्यात् नापि भिक्षुर्न पारिशेष्यो
पपत्तेः सर्व एते पुण्यलोका भवंतीति चाविरोधात्। पुण्यलोकाश्चामृतभाजश्चेति नहि भवति देवदत्तयज्ञदत्तौ मंद
प्रज्ञौ तयोरन्यतरस्तु महाप्राज्ञ इति। अत्रान्ये आहुः ब्रुवते। नायं रूढशब्दो ब्रह्मसंस्थ इति योगिको पब्रह्मणि संस्था
यस्येति जातिशब्दो गुणशब्दो योगिको वा संनिहितं विशेषं नातिवर्तते। यथा गामानय पथिकाय वतनं ह्रीत
स्थितश्चाग्नेयाधिकरणे अयं न्याय आग्नेयस्यौपांशुपालघृत इति अत्र यतिपरिव्राजकः तपः शब्देन संनिधापि
तत्वस्येह ग्रहणं नोपैतुतस्यमतत्वअशा। सुतरां भिक्षुः तपः प्रधानोऽभ्यासशेषोऽचातिरेकादिश्रमणमात्।
भवतित्वसामान्येनोपत्यपदेशोपपयोद्धिज्जमिति स्कंदजस्यापि ब्रह्मसंस्थता च ब्रह्मतात्तिष्ठोऽध्येतसाचसर्वाश्रमा
णामविशिष्टा। नचोद्धारालंबनं ब्रह्मसानुचिंतनमितरेषामशक्यमिति कांकलें नतेतेषां कर्मप्रधानत्वादृशा व्यामि
होप्यते किमिदं प्राधान्यं न तावत्कर्मोलानं लभनामिति तद् ज्ञापयते किंतु पुरुषार्थनया तथोक्तं कर्माण्यपि जैमि
निः फलार्थत्वादिति पुरुषस्यार्थः स्वर्गापवर्गौ तयोरपवर्गार्थी तदर्थे कर्म तदर्थमेव ब्रह्मापर्यायायेन क्रिय
माणं भवति अतएव ज्ञानकर्मणोरेकप्रयोजनत्वादविरोधः। तथाचाह तप आलातमेव लोकमुपास्ते नहास्य
कर्म क्षीयत इति स्वतः क्षयिकमिति अक्षयफलत्वादक्षयमुच्यते। यदि कर्मसंबंधमात्रेणामृतत्वं नाप्तीतिम
ते परिव्राजकस्यापि न स्यात् तस्यापि शौचाचमनस्नानभिक्षाटनादिकर्म कायिकं वाचिकं मानसं तद्

यदिहाप्यंधिषमाणशरीरस्येति न कस्यचिन्मुक्तिः स्यात्। तस्मात्सर्वेषां यथायोगं ब्रह्मनिष्ठता तासप्यंतनिष्ठतो
च्यते। न व्यापारांतरोपरमो यथा स्वध्यायनिष्ठः तपोनिष्ठ इति। यत्तूक्तं विरोधादिति तदयुक्तं अवस्थांतरापेक्षया
अविरोधात्। केवलकर्मिणः पुण्यलोकास्त एव ब्रह्मसंस्था अमृतत्वभागिन इति दृष्टांतेप्यविरोध एव कथं। यदि
तावन्महाप्रज्ञतान्यतरस्याभिधीयते तत्र वचनव्यक्तिरियं प्रज्ञौता वृद्धौता वृद्धौ तयोरन्यतरः शास्त्रज्ञो महाप्रा
ज्ञः स्यात्। अथवानुवादः पूर्वं मंदप्रज्ञावपस्तामिदानीमन्यतरो महाप्राज्ञो वर्तत इति कालभेदादविरोधः। अत्रायं
चाश्रमकर्मइति नाधिकर्तव्यमन्यथा प्रत्यवायात्। सर्वकर्मत्यागस्य चाभिध्यासंकल्पत्वात् यच्चैतेनियके वचनं न्या
समेवात्यरेचयदिति। न्यास इति ब्रह्मेति निर्वचनात्। ब्रह्माभिधीयते न कर्मत्यागः तस्य ब्रह्मणः सर्वतपसाप
रत्वं युज्यते तत्साधत्वात्। स्तुतिमात्रमुपादानमिति चेन्नापूर्वत्वात्। स एष रसानां रसतमः परमोर्ध्वोष्टमो यदुद्गीथ इत्येव
मादिस्तुतिमात्रमुद्गीथाद्युपादानात्। कर्मांगभूतानां उद्गीथादीनामुपादानकत्वात्तेषां स्तुतिमात्रं क्रियते नोपास
नाद्येयत्वमिति पूर्वः पक्षः सिद्धांतस्तु नापूर्वत्वात् पूर्वपक्षानिवृत्तिः अप्राप्तत्वाद्विधिरेव। चनप्रदेशात्तरविहितस्ये
उद्गीथस्य प्रदेशांतरे स्तुतिरुपयुज्यते। विधायकस्य पदसमूहस्यानंतरं पुरस्तात्परस्ताद्वा समाम्नातोऽर्थवादस्तेनैक
वाक्यतामेति। यथा वायुर्वै क्षेपिष्ठेति नतूक्तं विधिनात्रैकवाक्यत्वात्स्तुतिरपेक्ष्यते नातिधीमांस्तुरिति भावश्च उद्ग
इत्युद्गीथमुपासीत सामोपासीतेति विधिशब्दात्। पारिप्लवार्थामिति चेन्नविशेषितत्वात्। तथाचैकवाक्यो
पपात्। यथा चमसेनापोद्धरतीत्येवमादीनां विधिनैकवाक्यत्वात्। अर्थवाद अतथा दृष्टव्य इत्यादि विध्येकवाक्य

भा.त. संबंधात्प्रशंसार्थमाख्यानं एवं तत्तु संनिधौतत्र तेन समाम्नातमर्थवद्भवति। अतएवाग्नीन्धनाद्यनपेक्षा। विधि
स्तुतिविचाराधिकाराविप्रामोक्षायानंतरमधिकरणद्वयचिंतनं इतीत्यवाहिते संबंधाय स्मादूर्ध्वरेतस्सु आश्रमाः श्रु
तिप्रसिद्धाः सन्ति एव चाग्नीन्धनाद्यनपेक्षा विद्याभविष्यतीति। अन्यथा एकाश्रम्यपक्षे गृहस्थस्यैव न केवलं
वक्षेवत्कर्मसापेक्षे चस्यात्। यद्येवं केवला नाहविद्यातद्रूपार्थं साधयेत्। नकर्मीत आह। सर्वापेक्षा च यज्ञादि
श्रुतेरश्ववत्। सर्वेषामाश्रमकर्मणां अपेक्षाः सासर्वापेक्षा कुतः। तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति। यज्ञेन दा
नेन तपसानाशकेन इतिश्रुतेर्ज्ञानं प्रत्यंगत्वमस्ति द्वीयज्ञादयस्तत्तीयपादविभक्तांगत्वेन यथा यादिवाद्धधावेत।
अपूर्वत्वाच्चविधिरयं दधाजुहोतीतिसत्वाज्ञात्वा यायाः प्रकृतस्य प्रभुपसर्जनं त्वादेन प्रधानमानमु
ष्ठिनतमत्वादिति वृतमत्वेच ज्ञानस्यापवर्गस्याक्षमन्वादपवर्गेक्षमंचपारिय ह्ननरवशेषाविद्यानिवृत्ते
केउदकरववत्। नचज्ञानस्वरूपासत्तौ कर्मव्यापिपते श्रवणमननादितः दृष्टानिकारकंतस्माद्यथेवशमा
दयोयावज्जीवमनुवर्तंते विदुषामपवर्गप्राप्तिर्यथा मक्षीणीति नांनवालेपादत्यागः। यत्तुनः केचिदुच्य
ते। पुत्रैषणायाश्च वित्तैषणायाश्च लोकैषणायाश्च व्युत्थायाथ भिक्षाचर्यं चरंतीति। सर्वकर्मत्यागवादोमोक्ष
लिप्सतेति। तदसत्। प्रश्नादिलिंगाद्गृहस्थाद्युश्रवा या आश्रमान्तरं प्रतिपद्यत इति। स्वदृतिप्राप्तेमवानुद्यते। स्वस्व
वृत्त्युत्तरेन्द्रियाक्षेत्र्यपश्यादिविहितचरणामपि श्रौतं प्रसज्यते। स्वतोचमानता दौनि द्वाशु यज्ञोपवीतादि
नियमाद्धनाश्रमः स्वरूपतो धर्मतश्चानिर्ज्ञात इति नातिप्रसंगः यदप्युच्यते भैक्षाचरणपामं चत्वः प्रप

प्रमादाद्योप्यमादाच्च ब्रह्महृत्स्वेतानरोऽयविद्वान् अस्याश्रमिणः परमं पवित्रं प्राणावसम्यगपि संध्यामुष्ट
नितिः त्यक्तसर्वकर्मणां केवलादेवज्ञानादपवर्गं दर्शयतीति। तत्र शास्त्रतामंत्रार्थपरिज्ञानात्। यदितौश्र ५८
माननातिक्रम्य मेवर्तते। तेषामाश्रमित्वानाश्रमित्वएवप्रसज्येतेषां भोग्यत्वप्रायश्चित्तभाक्त्वाद्योगं
ज्ञानात्तदाप्रोवाचेतिविरुद्धं तस्मादतिसुपूजितार्थवितानिरुक्तकारवचनात् धूर्जिताश्रमिणोष्टस्तुत्या
ध्यायसत्यंनानिर्दिश्यंतेतेभ्यः श्रावाचेतमनार्थः तथाचवेदालिपरमेष्ठ्ये सुगुणा कल्पप्रचोदितं।
नाप्रपन्नाश्रमाद्वान्वं नाकुत्रशिष्यायं वाधुनः पुत्रशिष्यव्यतिरिक्तस्योन्ददादिति यमयनएतमेवा
र्थंदर्शयति जाबालश्रुतिरुदाहृयते। ब्रह्मचर्यं समाप्य गृही भवेत्। गृही भूत्वा वनी भवेत्, वनी भू
त्वा प्रव्रजेत्, यदि चेतरथा ब्रह्मचर्यादेव प्रव्रजेद्गृहाद्वा वनाद्वेति। अथ पुनरेव व्रती वा स्नातको वा
स्नातको वा उत्सन्नाग्निको वा ना सावप्रमाणीक्रियते स्मृतिभाष्यकारैरुदाहृतत्वात्। त्रिदण्डोपदे
शपंचत्वात्। अत्रापि कर्मत्यागो नास्ति नहि प्रव्राजिनशब्दस्य त्यागार्थोऽर्थान्तरे रूढत्वात् यत्तूक्तं
नायज्ञोपवीती कथं ब्राह्मण्याः स्यादितिप्रश्ने तत्संदिग्धजरस्ता योपवीतोपन्यासत्यागयोरभावा
त्। कथमकस्मादेव माषां कावचनं ब्राह्मण्यं चनर्थकं क्षत्रियादपि कथमयज्ञोपवीती
स्यात्। अतोऽदुर्बलदग्धेन केनापीदं वाक्यं प्रक्षिप्यमिति प्रतीमहे। तस्मात्स्मृतौ कृत्स्नकर्म

भाष्य. ८०

तत्साधनत्यागाशोकनर्थत्वेनिव्यामोहमूले चमनस्क्रतिर्यथाप्रधानंजगज्जेकारणमिति ज्ञानमप्रपस्क्रतिः। तथा तेषामे
वसारव्यादीनां सर्वकर्मापवादेन स्नानादेर्बकेवलात्मवर्गद्वयमस्न तिस्ता नमस्रतो येथिकर्मत्यागं वर्णयति तेष्व
यस्मिन्नुतिनप्रख्वतथा वापस्तं बेनोपन्यस्यनिरस्तं तत् शास्त्रेर्विधिप्रतिषिद्धं बुद्धीचेत् सैमप्रायणानिहैवनजुः स्वकू
पलभेतेतिनचविरोधांत्कर्मत्यागो अविरोधस्यदर्शितत्वात्। अपिचभेददर्शनोपगमाद्। कर्मत्यागाच्चमुक्तिभक्तेभुक्ति
रेव न सिद्धेता धियमाणशास्त्रयोभयोरवश्यंभावित्वात्। यदु च सर्वत्यक्तं कथं शौचाचमनभिक्षाटनादिप्रवृत्तिः
स्ववचनविरुद्धमेतत्संकर्मक्रियते चेति। कस्यचाहं तेनौशौचस्नानं वा शरीरधारणार्थं च भिक्षाटनमनर्थकं
ब्रह्मीभूतस्याभावाद्वर्तत्यस्य त्यागः स्यात्। तं प्राति को हि नाम स्वतंत्रः सन्कुणपं धेनुहेतक्षुत्पिपासयोश्चानिवृत्त
त्वादनिष्टनोन्मत्तमानां नुपपत्तेः। नहि ब्रह्मणोशनायादियोगो योऽशनायापिपासे शोकं मोहं जरां मृत्युमत्येति
श्रुतेरेवं वाक्यादर्थज्ञानमात्रान्न सांसारिकसमस्तनिवृत्तिर्भावोपगम्यते यादुपायनानंकिते हे शवीजप्र
दाहो नोपपद्यते। तथा च व्यासः बीजान्यग्न्युपदग्धानि न रोहन्ति यथा पुनः। ज्ञानदग्धैस्तथा क्लेशैर्नात्मा संबध्यते पुनरिति
दृष्टान्तवक्तकेन प्रकारेणाविद्यापवर्गो यथोगिनीस्यन्नातः। येद ज्ञानमविद्यानाशिदृष्टत्वात्तिदसत्। दृष्ट
विरोधात्। नहि वाक्यार्थज्ञानोतोकस्यचित्कदाचिदपि ज्ञानं निवर्तते। ध्रियमाणशरीरस्य शरीरेन्द्रियमनो
विरूपादिज्ञानमिति तानि निमित्ते सति नैमित्तिकं नोत्पद्यते। यथाग्नीन्धनसंयोगे धूमः। अत एव फल
ह सामर्थ्याच्छरीरं नते भोगार्थत्वात्। यदि च भेदप्रतिभासो नास्ति। परमेश्वराश्च गुणाः सर्वज्ञत्वा

दयमानुभूताः ततो लौकिकं वैदिकं वा कर्मयुगपत्निवर्तते। तं चाहं नजरनीयं नलुप्यते। भासा चेल्लौकिकं कर्म वैदिक
न तथा स्तुते। विद्यापवीतं न्याय कुतो धूनाभ्रांतिसत्त्वः। तस्माद्यावदिदं मम शरीरमिति कर्मानिबंधना वृत्तिरनुवर्तते
तावद्राश्रमकर्मानुष्ठानिरशक्यानि वारयितुं शास्त्रं तारणेनातिष्ठतोकर्पडनरात्मतः कर्तृत्वं शुद्धचैतन्यस्वभावत्वाद्
यथा तवलौकिके कर्माणि चोपाधिकमिदं कर्तृत्वं यादुपाद्यनुवर्तते। यथेन्धनसंयोगवद्वैधूमकर्तृत्वं आरब्ध
कर्मविनाशान्तु कर्तृभोक्तृते धावच्छरीरं भाविनी विशेषस्तत्वयंविद्दाविदुषोनोपाधिकेन्द्रत्वं मन्याविद्यानि तस्तु
वाभाविकमिति। यदि च जीवं नेव ब्रह्मभवानुः सर्वज्ञात्वा सरविज्ञांपवैदनमापिप्राज्ञोति न तत्सर्व [illegible]
श्चासो ज्ञाश्चेति विद्यते हीमकैं त्वस्य लेस सर्वस्य मिनदृत्तन्त्वात्। चैतन्यमात्रमवशिष्यते। तत्रानिः संबोधोक्षोऽभ्युपयः छस
ह तानित्यादासर्वज्ञत्वं सर्वशक्तित्वं चेति अतो जाववदवस्थायां न मोक्षोत्पद्यत्युपायभूतं ज्ञानं कर्म चानुष्ठेयं कर्पडन
कर्मण्योः तत्सुपाफल यथेव ज्ञानस्यात् एवन ज्ञानमविद्यां निवर्तयति। सत्संनद्धेद ज्ञानं निवर्तयतीत्युक्तं अनालत्न
स्व ज्ञानं यत्तिवंधकं निवर्तयतीति। चेतथा कर्माप्य ज्ञाननिमित्तमधर्म धर्मेण पापमपनुदतीति श्रुतेः महारज
नादरूपाणां चात्मानं धूपयित्वा क्षितानापकर्षणं ज्ञानं कर्मभ्यां चान्यमभ्यत्वा दृष्टनभ्यावस्यकेन धारेणोयकर
तीति कोजातीयान्मात्स्नुत्यान्नातदेव वेति। तथा हि कुर्वन्नेवेह क्रियावानितिच तन्न चयापिधत्ते न चालरतिवे
वक्ति येतेषां वेने वक्तुं कि यांगतो यलब्धेः। न च बहुव्रीहिनिर्देशात् अलरतिः क्रियापस्तमोयमालरात्क्रियद्वृत्ति
बहुव्रीहिणामनुवर्ष्योक्तत्वात्। क्रियावानिति मनुपस्त्यध्यानुपपत्तेः अन्य वद्दितयोग्यताविदर्शने

भाष्य. ८०

बृहद्ग्रहणदोषोऽश्वोऽश्ववन्न आगन्तुकर्माणि। एवं कर्मसहिता विद्यापवर्गप्रापयतीति। शमदमाद्युपेतः स्यात्तथापि तु तद्वि
धेस्तदंगतया तेषामवश्यानुष्ठेयत्वात्। यज्ञांगत्वेऽपि शमदमाद्युपेतः स्यात्कर्मात्तद्विधेः शान्तो दान्त उपरतस्तिति
क्षुः समाहितो भूत्वात्मन्येवात्मानं पश्येदिति। तेषामवश्यानुष्ठेयत्वादिदमन्तरंगसाधनं कर्म बाह्यमिति विवेकः। स
र्वान्नानुमतिश्च प्राणात्यये तद्दर्शनात्। प्राणासंशये श्रूयते। न ह वा एवंविदि किञ्चनानन्नं भवतीति प्राणादिवत्प्राण
६ विद्यांगतयासर्वान्नभक्षणं विधीयते। किं वा तु सर्वान्नभक्षणं संशयः। विधिसंभवे स्तुतिर्मा न भवति प्राप्त
त्वेन स्तुतिरियं वर्तमानापदेशात्। न स पापं श्लोकं शृणोतीतिवत्। न चाकृतविधौ कल्पनं नामिति न माकिः सर्वशरीरव
तिनः प्राणस्य सर्वमन्नमिति नाविधिर्विधीयते। न वाश्वादिमर्यादमन्नं मानुष्येण शरीरेणोपभोक्तुं शक्यमतः स्तुतिमा
त्रं नन्विदं मा ह सर्वान्नानुमतिश्च प्राणात्यये अत्र न तिरस्कृता नैकाद्यपायापदेश दर्शनात्। अत्ययेसतिभक्षण
दर्शनाच्च चाक्रायणादिऋषिरिभ्यादिदृष्टस्पष्टं कृतवानिति॥ अबाधाच्च। इतस्थाहारशुद्धौ सत्त्वशुद्धिरित्याधार
आपि स्मृतेः। प्रतिवितारस्य मापन्नो योऽन्नमत्ति प्राणसंशयः। लिप्यते न स पापेन पद्मपत्रमिवाम्भसीति। शब्दो का
मकारे। अकामकारे यथेष्टाचरणनिवृत्तौ कथं हितापापाद्धीनत एवं हेतुरेकत्र अबाधात्। तस्मा ब्राह्मणो सुरां न पि
बेदिति। विहितत्वाच्चाश्रमकर्मापि आ ज्ञातदिश्रुतेरितिविधांगकर्महेतुकं येऽनन्तरपवर्गादिनो न प्रभवति अश्रमाको
वार्हि स्वाश्रमकर्म न प्रोक्तास्तांकापामाहतेषामप्यश्रमप्याश्रमकर्मत्वात्। विहितत्वादप्युद्दधार्यं तेऽपि
कुर्यः। प्रसवायपरिहारायपि सर्वे एते पुण्यलोका भवन्तीति केचित्। किं तु स तेऽगहत्यागान्यव त्यागैपान्यायेन का

हिमानं योगरूवकर्तुं योग्यो भवतीति॥ ऐहिकमप्रस्तुतप्रतिबंधे तद्दर्शनात्॥ पाण्डित्यं च बाल्यं च निर्विद्यानिश्चयेनलब्धा योग
हिमानं योगरूवकर्तुं योग्यो भवतीति। आमुष्मिकमिति संशये स्यादैहिकं कस्मादृष्टार्थत्वात् विद्यायाः न हि कश्चि
मन्यस्य तो विद्याफले किमैहिकमाहोस्वित्॥ आमुष्मिकमिति संशये स्यादत अतो स्मिन् जन्मनि विद्यायां यतते तेनैव न तत्फले नर्भवितव्यमि
त्यवश्यमेवविद्याजायतामिति। कामयमानो विद्यामभ्यस्येत अतो किंतु प्रवृत्तं फलकर्मादेशकालादिनिमित्तापेक्षत्वात् तद्वत् प्रतिबंधा
तिप्रास्ते भूमेः। स्यादैहिकं विद्याफलं प्रस्तुतप्रतिबंधे सति प्रस्तुतं प्रवृत्तं फलकर्मादेशकालादि निमित्तापेक्षत्वात्
भावो दायातिव प्रतिस्वफलप्रसवाय लब्धावसराविप्रवर्तते न तदा विद्यामधिगतावेवं वेगात् कुराटी प्रवर्तते न त्वका
र्यं कर्तुं प्रभवति। अतिजन्मान्तरे तत्फलं कुतस्तद्देशात्। श्रवणायापि बहुभिर्यो न लभ्यः शृण्वन्तोऽपि बहवो यन्न विदुः कश्चि
द्धीरः प्रत्यगात्मानमैक्षदिति स्मृतिरपि अप्राप्य योगसिद्धिं कां गतिं कृष्ण गच्छति। अनेकजन्मसंसिद्धस्ततो याति
परां गतिमिति। अतो अनेकजन्माभ्यस्तात्कारिजन्यापवर्गं प्रापयिष्यतीति गुर्वोर्हि सत्त्वादिभिः कर्मानुसारिभिः
७ कल्कधर्मपकर्षमुपहीयमाना नरिवत्तु रंगादिभिः संसारसागरं विद्याकथं विदारितार्दयतीति॥ एवंमुक्तिफलानि
यमस्तदवस्थावधृतेः। एवमिति मुक्तिः परामर्षः साधनभूत विद्याकर्मात्क वीपक थीपेक्षया मुक्तिफ
लं न स्यान्नियमो मुक्तेहैवेति न स्वरूपतः कस्मात्तदवस्थावधृतेः परमात्मावस्था हि मुक्तिरवधारिता सा चैक
रूपा ब्रह्मविदाप्नोति परं ब्रह्मैव सन् ब्रह्माप्येति। आनंदं ब्रह्मणो विद्वान् न बिभेति अभयं वै जनक प्राप्तोऽसीति। यत्रात्मत्वं नोपा
सनानुष्ठानतारविद्यानारद्दफलं कर्माद्यहमयोः कथंचनेतद्रातिव स्थानः॥ इदमभ्यासोऽध्यायसमाप्तिद्योत
नार्थः॥ इति शारीरकमीमांसाभाष्ये भगवद्भास्करप्रणीते तृतीयोऽध्यायः समाप्तः॥ ॥ ॥
तृतीयेऽध्याये परापरविद्यास्वरूपविशेषविचारो वृत्तः। अथेदानीं तास्वेव फलम्
आवृत्तिरसकृदुपदेशात्॥

भाष्य. चिन्ता वर्तिष्यते। आत्मा वारे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः॥ इति सोऽन्वेष्टव्यः स विजिज्ञासितव्य इति तावं
स्यते॰ कृतमकृतस्त्वयः कर्तव्योऽसमकृदिति सकृत् श्रवणं मननं ध्यानं च कर्तव्यं आवृत्तिप्रमाणाभावादिति प्राप्त उच्य
ते प्रत्यथावृत्तिः कर्तव्या कस्मादसकृदुपदेशात् श्रोतव्यो मन्तव्य इति श्रवणमननयोरसकृत्कि प्रमाणयोर्वज्ञानं संशय
विपर्ययनिवर्तकमाविषयं यस्यज्ञानमुत्पद्यते दृष्टार्थत्वादवहननादिवत्॰ यथा च मीमांसादिशास्त्रेषु बहुशः
श्रवणात् मननादर्थज्ञानप्रकर्षो ज्ञायते न सकृत् आवृत्त्या विसंवादितव्यं ॥ सिद्धान्ति कृपासनं शब्दा तत्र हि
नि वच ॥ नोपं वेदमयुज्यते विदितासमानार्थः। कथं तस्येदाहृतस्य ध्येयमात्मेत्येवोपासीत। पस्सदेस्सवेदसांदे
वतामुपास्स्व इति मनो ब्रह्मेत्युपासीत ध्यायति चतयति च कीर्त्या यशसा ब्रह्मवर्चसेन॰ यएवं वेदेति लोके पितुरुमुपा
स्ते राजानमुपास्त इति यो ध्यस्तदनुवर्त्ति करोति स एवमुच्यते न हि शक्यं शास्त्रिः पर्यन्तुयोक्तुं शक्यते॰ ० यथा प्र।
किं धौन्त तरार्यपर्यावस्था यातशङ्केतिवकुर्वचेति पदिसमाप्यते नेवतिच वेदादपि शब्दार्थ व्युत्पत्तिः त्रिश्वद्दादिश
ब्दानामिवत्रिवत् तरङ्गः स्तोत्रे यथा मायांनवसरं आपां प्रमुक्तो ऽत्राह स्तु पश्यतः स्माभिः श्रवणमुक्तिध्यानसह
दनुष्ठिताः स्यां तत्त्वे पर्यार्थव्युत्पत्तिपुरःसरं आत्मस्वरूपविषयज्ञानं कस्यचिद्यः सदेव ब्रह्मात्मेत्च मनुस्मविलु
न शङ्कुयात् चित्तसंस्कारपाटवान्नान्यतमयाहित्था स्तोऽयंप्रेलतत्वमसि तत्त्वमसि स्येत श्वेतो इत्युपदिष्यते तस्य प्र
तिपत्तिकारणं निरस्त इत्यन्यदपि न वहुत्वउपादिश्यते ० या वद्विद्या नुवर्ततेतावत्पूर्वमनुवर्तते तत्क्रिं सो ब्रह्म
तत्सात्किं नाम कर्तव्यं स्यादित्युपकल्पः स्यात्पश्रवणमननध्यानसाक्षात्कार ज्ञानमुत्पद्यत इति वार्तते तत्श्वेतकेतो
रपि यत्र बहुः श्रवणं मतादृश्ज्ञाने संशयादि निवृत्तिर्नासीत् किं तु रवं मनुष्याणां रागद्वेषोपकलुषितचेतसां

क धर्मपरस्तु प्रत्यवते ततः। प्रायश्चित्तं न पश्यामि येन शुद्ध्येत्स आत्महा इति तदर्थो गात्यनस्मरणात्यो गात् उपकुर्वाण
स्य प्रायश्चित्तं अपि शार्ङ्गः संश्रावणं ब्रह्मचारित्वाविशेषात्तदुक्तं प्रमाणलक्षणे शास्त्र स्वभावात्तं निमित्तत्वात्
स्य तिरपि सन्त्यस्य पुरुषाभिः कश्चित् प्रत्यापत्तिर्ब्राह्मणजेनुपः स वेरेत्कुस्यमश्रालः पशुमाया प्रत्यनन्तरमितः वा हिंसि
भयधमस्तेराचाराच्च। प्रत्यवनं महापातकं वा उभयथा बाह्यः कार्यो सोऽशिष्टैः स्वतेराचद्धोनेष्टं कंधर्ममिति
शिष्टाचाराच्च नशिष्टास्ते सहभोजनादि समाचरन्ति॥ स्वामिनः फलश्रुतेरित्यात्रेयः॥ अङ्गाश्रितान्युपासना
नि स्वामिनो यजमानस्य कर्तव्यानि किं वा ऋत्विजां मात्रेति किं युक्तं स्वामिनः फलश्रुतेः वर्षति हास्मै वर्षयति च य एवं
विद्वान्वृष्टौ पञ्चविधं सामोपास्त इत्यात्रेय आचार्यो मन्यते स्म आर्त्विजमित्यौडुलोमिः तस्मै हि परिक्रियते आर्त्विज
मात्विजां कर्तव्यमुपासनमित्यौडुलोमिराचार्यो मन्यते स्म। यतस्तस्मै सांदृ; प्रधानकर्मणां कर्म करोपरिक्रियते। ननु दी
क्षासोमस्य दक्षिणा सोमस्यापि प्रधानमात्रार्थाश्रयत्वेसत्यमंदैः वक्रिप्रमाणेरंगानुरक्तं प्रधानमेव कर्तुमशक्य
मित्यतो ऽन्यार्था विशेषतिप्रसंगल क्षणेऽस्थापितमंगप्रधानयोरेकोऽहि प्रयोगस्तास्ति ध्यर्थे ऋत्विजो क्रियते
तस्मादंगान् कुर्वतानदाश्रितं ज्ञानं कर्तव्यं मंदानिर्दृ त्यपरसोपभृ यास नाविधः तस्य दृक्तं कर्ता रमाश्रित्य लाभ
न लाभते स्वयमप्रयोजकत्वात् गोदाहनादिवत् उद्गाता च प्रहर्त्तित एव करोति। फलं तु न यजमानस्यैव तद
र्थत्वात् यां वै कां चनाशिषमृत्विज आशासते सा सर्वा यजमानस्यैवेति श्रुतेः आपयिता ह वै कामा
नां किं ते काममागायानीति स ह वेनेद्धिवायाव्याह उद्गाता बभूव सहास्मै कामानागायदलगानं कर्तव

शारीरभाष्यरत्न.

श्रुतेर्भाष्यमिति· सहकार्यंतरविधिः पक्षेण तृतीयं तद्वतो विध्यादिवत्· तस्माद्ब्राह्मणः पांडित्यं निर्विद्य बाल्ये
न तिष्ठासेद्बाल्यं च पांडित्यं च निर्विद्याथ मुनिरमौनं च निर्विद्याथ ब्राह्मण इति बृहदारण्यके श्रूयते· तत्र संदि-
ह्यते· मौनं विधीयते उतानूद्यत इति· किं तावत्प्राप्तम् अनूद्यत इति मौनं च ज्ञानं तत्पांडित्येन गतमित्येवं प्राप्ते ब्रूमः
सहकार्यंतरं विधीयत इति विधिः। तृतीयं मौनं ज्ञानित्वाभ्यासापेक्षपात तद्वतो विद्यावतो ननु पांडित्यग्रहणादेव
सिद्धं मौनं नेत्युच्यते· ज्ञानप्रकर्षपक्षेण मौनस्यापूर्वत्वात् विधिरुपपद्यते· ज्ञानप्रकर्षवाची मुनिशब्दः मु-
नीनामप्यहं व्यास इति दर्शनात् अनेनोपमर्दो ज्ञानातिशयमापादयेद्योगाभ्यासं कुर्यात्· ज्ञानपरिपाका-
पेक्षः विद्यादिवद्यथाग्निहोत्रादि अविदुषो विधीयते फलातिशयार्थिनः तथा यं विदुषो व्युत्थायिनोऽपव-
र्गार्थिनः संन्यासिनो नैष्ठिकस्य विधीयते॥ कृत्स्नभावात्तु गृहिणोपसंहारः॥ गार्हस्थ्याद्व्युत्थानं यद्यस्ति क-
थं छांदोग्ये गृहस्थेनोपसंहारः। कुटुम्बे शुचौ देशे स्वाध्यायमधीयानो न स पुनरावर्तत इति· तत्रोच्यते। तुशब्दो
विशेषार्थः कृत्स्नकर्मज्ञानोपसंहारात् गृहिणोपसंहरति कृत्स्नं श्रौतंस्मार्तं च कर्म अस्त्ववर्ज्यमतः कालनियमात्
ज्ञानं च॥ कृत्स्नमाधवनो नाहि साध्यकृत्स्नं गतमित्यभिप्रायः। मौनवदितरेषामप्युपदेशात् कृत्स्नेदृश्य
वचनं तावद्विधिं च्योगं प्रतिपन्नव्यानीति। अनाविष्कुर्वन्नन्वयात्॥ बाल्येन तिष्ठासेदित्यत्र विचिन्त्यते· किं बालचरितं
बाल्यं उत यथा बोध्य तथा भावशुद्धिर्बाल्यमिति तत्र कामचारादिर्वाल्यमिति पूर्वः पक्षः तदुच्यते। अनावि-
ष्कुर्वन्नन्तर्गतं चेतोवृत्तिं लोकस्यापरख्यापयन्दर्पादिरहितो भवेत्॥ कस्मादन्वयात् मौनेन शुद्धभावो

व्यानिकर्माधिकर्तव्यानीति प्रतिपाद्यत इति वदति न युक्तमितिचिन्त्यं॥ सहकारित्वेन च यथोक्तमाश्रमधर्मत्या-
कर्तव्यानि तु वार्थवदन हि विद्योपयोगित्वं नेष्यते विद्यासहकारित्वेन यत्र इधिकृतेन कर्तव्यानि सहकारित्वं च
विविदिषन्तीत्यन्नव्याख्यातं पुरुषार्थानि च विद्यार्थानि च केचित्कर्माणि कथं योगभेदादेकस्य तत्रभयत्वे संगय-
च्छमितिस्यात् यथा दध्ना जुहोतीति क्रत्वर्थो विनियोगाद् दध्नेन्द्रियकामस्य जुहुयादिति पुरुषार्थस्तद्वत् सर्व
यापित्वोभयलिंगात् सर्वपापकृष्माण्डर्पणमादिविद्यार्थत्वं वाक्यप्रमाण्यापादयः। तदेव कथमनुभयलिंगात्
यज्ञेन दानेनेति कर्मणा उद्दिष्टम् एव कर्मरूपं कुपादाय तानसहकारित्वेन उपादीयमानत्वात्· तदेव कर्मप्रत्य-
८ भिज्ञायते· स्मृतिकारैश्चाश्विहुतवदुपादानाग्निहोत्रदर्शपौर्णमासादीनां पुरुषधर्मतया विनियोगात्· तदेवं वधा-
रणं वाच्यं कर्मान्तरबुद्धिर्निवर्त्यते· यथाकुण्डपायिनामयनेभ्यासमासमग्निहोत्रं जुहोतीति होमांतरं न बुद्धिर्भवति
तत्रस्तत्संसिद्धिः विद्यार्थमपि क्रियमाणं कर्म नित्यात्मकमभिमतं· कर्मान्तरपेक्षाप्राप्तिः स्यादिति कर्तव्यतावाप्या
चेष्टव्यमिति· अन्नाभिवंचदर्शपाततरागादिभिरवाध्यत्वमेव स्यात् न भ्याति· यं ब्रह्मचर्यं वा तु विदतीति·
ब्रह्मचर्यपञ्चादिसाहितमात्मज्ञानं नश्यतीत्यर्थः। अन्तरा चापि तु तद्दृष्टेः। विनष्टदारा अकृतदारा वा आश्रम-
मन्तरालेवर्तनेषा विद्याधिकारोऽस्ति नेति· द्रव्यार्थत्वेनैतान्वदाश्रमिणामधिकार इति तथा प्राप्ते विधी-
यते· अपिशब्दो वचनान्यानि तु तत्स्पर्शो नरालवर्तिनामपि भवत्यधिकारे ज्ञानापि धर्मविशेषैरहिंसासत्य-
वचनजपोपवासदेवताराधनादिभिरनुग्रहो विद्यायाः सम्भवात् स्मृतिश्च। अनेकजन्मसंसिद्ध इ

॰ २५

भाष्य॰ टी॰ ति॰ नाचैव जन्मनि कृतं कर्मोपकरोतीति अभिप्रायः ॥ अतस्त्वितरज्ज्यायो लिंगाच्च ॥ अतोऽन्तरालवर्तित्वादितरस्यां
श्रमवर्तित्वं॰ ज्यायो विद्यासाधनं श्रुतिस्मृतिविशेषार्थः स्वाश्रमकर्मोपयोगद्विधाया: साकल्यमुपपद्यते लिंगं च तेनेति श्रुत्या विन
पुण्यकृत्तैजसश्चेति देवयोनेन यथा गर्भवमा आभिदर्शयति॰ कथं गम्यते॰ पेचेमेरण्य इति पञ्चाग्निविद्यायामरण्य
वासिनां पारिव्राजकादीनां निर्देशात् तत्र आश्रमान्तराणि समाहृतानि॥ श्रमी नाति छेते इतानिं दात्र वनादाश्रमान्तरप्रतिपत्त्यर्थं
नवेके नवि निमित्तेनापवर्गीयमनुपगम्यते॰ तथा चाहयाज्ञवल्क्यः ॥ नाश्रमः कारणं धर्मे क्रियमाणो भवेद्धि सः ॥ अतो
यदा लनो यथ्यं परस्य न तदा वरेत् इति हारीतश्च ॥ विधाय तत्र विनीतस्यानिष्टं हीतेदिस्यच ॥ आश्रमे वर्तमानस्य आश्रमे
॰र्के प्रयोजनं॰ तद्भूतस्य तु नातद्भावो जैमिनेरपि नियमात् ॥ रूपाभावेभ्यस्तत्त्व इतरत्रऽआश्रमाद्रूत्कं तत्तः प्रभूतिकास्ति
नेति चाप्यते ततः प्रवृत्तो नाश्रमी विशुद्धादिवति समानो पिनप्रयुज्यति नियमे हेत्वभावादिति आशंक्यते॰ तद्भूतस्य प्र
तिपन्नो इह नेहोभास्य न कथं विदप्यतद्भावो ततः प्रच्युतिः स्यात् कुतो नियमात्॰ अत्यन्तमात्मानमाचार्यकुलेवसादयं
निति॰ तथा चारण्यमियात्ततो न पुनरेयात् ताचार्येणाभ्यनुज्ञातश्चतुर्णामेकमाश्रमम् आविमोक्षाच्छरीरस्य सोऽनुतिष्ठेत्
यथाविधीति॰ यथा च ब्रह्मचर्यं समाप्य गृही भवेदित्यारोहवचनानि न तथात्र प्रत्यवरोहस्य वचनानि दृश्यन्ते
शिष्टाचाराभावाच्च जैमिनेरपीत्यपिशब्देन जैमिनिबादरायणयोरुभयोरत्र संप्रतिपत्तिरिति दर्शयति ॥ न चा
न चाधिकारिकमपि पतनानुमानात्तदयोगात्॰ श्रृत्नचापवकीर्णिनि दसं नं गर्दभमालभेतेति पदाधिकारिकार
कमाधिकारिलक्षणेषष्ठेध्यायेनिरूपितं प्रायश्चित्तं अवकीर्णिप्रयुक्तत द्वदाधान स्याप्राप्तकालवादतित
दविनैष्ठिकस्य न भवति कुतः पतनस्मरणात् ॥ अनुमीयमानश्रुतिमूलत्वाद्ब्रह्मानं स्मृतेः ॥ आरूढो नैष्ठि

यदप्युक्तमविद्यानिवृत्तेः हलतत्त्वतेति तत्र भवत एष्टामः ॥ ज्ञेयमविद्यानिवृत्तिरनिष्टेति यावत् ॥ सकलक्लेशानलि
वृत्तिरिष्टा शक्या पारस्युर्मर्यादा ख्यातिः ॥ अवस्थन्तान्यो जयितव्यं तदर्थमेवाहिशरीरं ध्रियते ॥ श्रुतिश्च न ह वैसशरीरस्य सतः
प्रियाप्रिययोरपहतिरस्तीति॰ ननु तेन धर्मत्वात्सुखदुःखयोरहेस्तु खी दुःखीत्यभिमानो मिथ्याप्रत्ययः कोयं स्यात् उच्य
चाप जापः किं परधर्मस्य संवेदनं नोपपद्यते॰ यथा नीलं पीतमिति द्रव्यगुणः संवेत्ते अतो दुःखानुभवो नैव मिथ्याकार
णदोषबाधकप्रत्ययाभावात् ॥ अथ पारमेश्वरगुणानां सत्यसंकल्पादीनामपि व्यक्तिः स्यादित्यपेतः येनाहं मुक्तो
स्मीति प्रतिपद्यते॰ परो नुमानेनजानीयात् स चाविद्यासति पुरुषमेकमवानेकं वेति॰ यद्येनेकं तत्तोऽपर्यस्तत्वं प्राप्नोति
तत्त्वात्त्वात्मनोऽनिर्वचनीयेति विहायेत ॥ एकत्वे च युगपत् सर्वमुक्तिप्रसंगः कस्य चेयमविद्यानेश्वरस्य विरोधात् ॥
न जीवस्य ॥ नांतेषामवस्तुत्वप्रतिज्ञानात् यदप्युच्यते कस्याविद्येति दृष्टेतस्यत्वेस्य स्त्वमदृष्टसीति तत्र प्रिय दुःखेन तर्क्यं प्र
सौ ब्रह्मोऽहं जीवः परस्मात्तयोरा इतित तातुत्ऽभासत्वमेवतेतस्माद् नालेषुदेहादिषु विपरीतप्रतिपत्ति ब्रह्मस्वरू
पाप्रतिपत्तिश्चाविद्या सा सम्यक् ज्ञानोत्पत्तौ निवर्तते॰ तत्र सम्यग्ज्ञानमुत्पन्नमीत्यावज्जीवम स्य मानं पार
उक्तमपवर्गस्तमं न वतीति शास्त्रादवगम्यते ॥ ज्ञानं यद्यपि दृष्टार्थमपुनर्जन्महेतुत्वं तु केवलशास्त्रसमधि
गम्यमेवान्यथास्तु सुषुप्तिप्रलययोरिव शेषतावि द्याशक्तौ युक्तस्य पुनः प्रादुर्भवेत् ज्ञायंते चास्य कर्म्माणि
इति ल्लासो पेस्यं॰ अतिरिवेतनचोपसनं विधीयते विज्ञाय प्रज्ञां कुर्वीतेति ऽनुविद्य जीवीजानातोनित्ये

दास्मानं ध्यायथ । निचाय्य तं मृत्युमुखात् प्रमुच्यत इति आत्मस्वरूपविषये विशेषज्ञाने वाप्युत्पन्ने सम्यग्ज्ञानस
भा० ष्य॰ त्ययावृत्तिजन्यत्वम् उपासनेय्यावज्जीवं कर्तव्यमित्यधिकरणतात्पर्यार्थः । तदेतत्तत्त्वं श्लोकौ चात्र भवतः ॥
उक्तं तत्त्वमनादृत्य देदुर्यत्तो गच्छते यदि तत्रात्मस्मानिदिध्यासं वाच्मे गच्छतां नि मिति ॥ शास्त्रार्थं तत्त्वतो ज्ञात्वा चरिष्यामो
वयं सदा ॥ ननो व्यसनिता काचित् विमतिप्रतिबोधने ॥ प्रदृष्टुच्यते अनियोज्या ब्रह्मविदः शास्त्राविषयत्वादुपा
सनाधाना अप्रकर्म्मणि चानधिकार इतीतदपि समन्वमात्रं मन्यामहे हि यतो नेव इह मनिं प्रवृत्तज्ञान स्वाभाविक कर्म
णासनाभजप्रवर्तकपर्याकापे । इत्युक्तः केऽनुशोचामनादिषु बुद्धिरेव रागप्रकृतेषु वर्त्तते ॥ ब्रह्मीभूतश्चेत्स वर्तना
नियोज्यश्चन्मन्त्रिणि इह शास्त्रार्थैकदेशानुष्ठानेन च प्रमुक्तं तथा हि क्रियते कर्म किंचित्तु त्यज्यते किंचिदित्यपि नैत
त्यशास्त्रानुष्ठापस्वच्छन्दपरिकल्पनो शोचाद्यपि न कर्त्तव्यं जीवन्मुक्तस्येति भगिनीनामसम्बन्धात् शरीरस्य नात्म
नो नित्यमुक्त इति । अस्तु ज्ञानं यथार्थं यथा स्थितिरुपजायते पदार्थज्ञानं च निमित्तं ज्ञापर्थज्ञानस्थलतरं ते न
नवितन्यं यत्किंचित्पदार्थस्य स्थितिः श्रवणमननगुरूपासनसामग्रीसंपत्ती सत्यामपि तत्प्रतिघाते कालांतरे ज्ञिकातेप्र
त्याशा आरंभकफलक कर्म प्रतिबंधेन भ्रान्तो स्पद्यते इति प्रव्य ननु कदा चिज्ज्ञानोत्पत्तिः संभवेदारब्धफल कर्म प्रति
बन्धस्याव श्यंभाविता ज्जीवतं तत्फलत्ति फलेन प्रतिवन्धात् । मतस्य चेतरे लोलिनं च वाक्यार्थज्ञानं प्रतिहेतुः प्रत्य
भावात् कर्मक्षयोऽहितहेतुरविदुषां तद्दर्शनादुपास नीयभीष्मादीनां च प्रतिविधा प्रकर्त्तकानां स्मरणश्रुति विदेतद्वि

विरोधात् सुकृतस्य तु शास्त्रीयत्वान्न विरोधः । विद्ययेति प्राप्ते विधीयते तस्याप्यश्लेषविनाशौ स्यातां तत्र ष्यिल्तति देशो
यथा पापस्य तथेतरस्य पुण्यस्येति योगार्थत्वात् विरोः विशिष्टो ह्यत्रे वैषम्ये तेतरत्वी तिश्रूयते चास्य तिवा । विशेषा
तदैते तं सेतुमहोरात्रे तरतः इति ० अत्र सुकृतदुष्कृते परामृष्य सर्वे पाप्मानोऽतो निवर्त्तत इत्याह तु शब्दो ऽवधारणार्थः
शरीरपात्ते विदुषो मुक्तिरवश्यंभाविनीति द्विधा मुक्तिर्जीवदवस्थायां रागद्वेषमोहैः तदर्थैः श्रमदादिभिः विमुक्तिः
पातोऽन्तरकालमात्मुक्तिकीति ॥ अनारब्धकार्ये एव तु पूर्वे तदवधेः पूर्वयोरधिकरणयोः पुण्यपापयोर्ज्ञाननिमित्तो
विनाशो वगतः सश्चिमविशेषेणारब्धकार्ययोरनारब्धकार्ययोश्च भवत्युत विशेषेणानारब्धकार्ययोरेवेति विचा
र्यते तत्र ज्ञानशक्तेरविशेषात्तत्तदविशेष इति पूर्वपक्षी मन्यते तत्राचक्ष्महे पूर्वे पापपुण्ये अनारब्धफले विनश्यतः
न पुनः प्रवृत्तफले यास्याभिः ब्रह्मज्ञानायतनं शरीरमारब्धं कथं गम्यते तदवधेः तस्य तावदेव चिरं यावन्न विमोक्ष्ये
पस्ये पत्स्य इति तकारलोपश्छान्दसः कथं पुनर्ज्ञाननिशक्रोः कर्मनस्य किंचित्कर्म यते किंचिन्नेति अस्माकं न श्रुतिः
शक्तिव्यवस्था नुमीतियथाग्निरन्न परलेन दहति इन्धनं तु दहति कोऽ त्र पर्य्यनुयुज्यते ० विचित्रा हि शक्तयो भावा
नां ये पुनर्मायामात्रवादिनः तेषामेवाज्ञावस्थानोपपद्यते कथं विद्याया मुत्पन्नायां ह त्वा मायायां पास्तायां तत्
पापप्रपंचो न कर्माणि न संस्कारा वस्तुतः विदन्ते मायावादिनः तत्र किंचित्कर्म क्षीयते किंचिन्नेति विभागो दु
र्वचो न च कुलालचक्रदृष्टान्तः संभवति तत्र वेगाख्यस्य संस्कारस्य वस्तुभूतस्य चंड्रकारचयो विधते नात्र सं

स्कारः॥ तदाश्रयो वा विद्यते अविद्यामात्रत्वात् कायार्थानिस्युपगमाद्विचंद्रदर्शनोप्पयुक्तः तत्रतिमिरस्य मि
भाष्य॰ थ्याज्ञानहेतोर्वस्तुनः तस्याविद्यमानत्वात्॥ यदुक्तं केचिद्बाधितमपि मिथ्याज्ञानं द्विचंद्रज्ञानवत् संस्कारवशात्
कांचित्कालमनुवर्तत॥ एवोतितदपि मस्तु तुक्तं नयसतो गेहमेदपक्षएवसत्त्रे श्रुतिश्च घटते तद्वधेह्यिति शरीरपाता
वधिक्षेपकरणादित्यर्थः॥ अग्निहोत्रादि तु तत्कार्यायैव तद्दर्शनात्॥ नदिवहितं हि विज्ञानसामर्थ्यात्। धर्म्माधर्म्मयोर्नि
वृत्तिरग्निहोत्रादि नित्यं कर्म्म विदुषा न कर्त्तव्यं क्रियमाणमपि तद्विज्ञानेन निवर्त्यते किं कृतेनेति नेति आसे तु
च्यते विदुषाप्यग्निहोत्रादि कर्त्तव्यमुक्तमेतत्॥ सहकारित्वेन वेति समुच्चितामामेव ज्ञानकर्म्मणामविद्यानि
वृत्तिरुपयोगोऽस्य ज्यते नान्यतरेणेति तत आह तत्कार्यायैव ज्ञानकार्य्यमपवर्गः तद्दर्शनात्यज्ञेन दानेनेत्यतो
यावज्जीवमाश्रमविहितं कर्म्म कर्त्तव्यं॥ अतोऽन्यापि ह्येकेषामुभयोः॥ किं विशेषं पुनरश्लेषविनाशवचनं किंविष
यवाती विभागवचनं एकेषां शाखिनां तस्य पुत्रा दायमुपयन्ति सुहृदः साधुकृत्यां द्विषन्तः पापकृत्यां इति तत्रो
त्तरं अतोग्निहोत्रादेर्नित्यात्कर्म्मणोऽन्यापि ह्यस्ति साधुकृत्या काम्यकर्म्मफलाय क्रियते अस्ति च पापकृत्या
सत्प्रतिषिद्धमाचर्यते तद्विषयोयमश्लेषविनाशावगमः कृतः तद्विषयश्चैकेषां शाखिनां विनियोगः उभयो
र्जैमिनिबादरायणयोर्मतमिति विवरेव विषये तिष्ठिसमत्ते केचित्पीयते तदनर्थकमित्युपेक्षणीयं भोगेन त्वितरे
क्षपयित्वा सम्पद्यते॥ अनारब्धकार्य्ये पुण्यपापे भोगेन क्षपयित्वा ब्रह्म सम्पद्यते तु शब्दोऽवधारणे योपिद्यथास्मिन्

यदिति। सत्यं तद्वेदस्मृतं भवति॥ आप्रयाणात्तत्रापि हि दृष्टं॥ अथ स्तरा थे धिकरणस्थित। तत्र किं
भाष्य॰ यावज्जीवमभ्यसनं कश्चित्कालमिति संशये किंचित्कालं कृतो पुर्नमेघास्तर्थस्य कृतत्वादिति प्राप्ते॥ आ
प्रायणादामरणात्तत्रापि मरणकालेऽपि प्रत्ययावर्तनमग्निरहस्ये शांडिल्यविद्यायां श्रूयते॥ अथ
खलु क्रतुमयः पुरुषः यथावत्क्रतुरधमस्माल्लोकात्प्रैति एवं क्रतुर्थमुं लोकं प्रेत्याभिसंभवतीति क्र
तुशब्दः संकल्पविशेषवचनः॥ तदधिगम उत्तरपूर्वाघयोरश्लेषविनाशौ तद्व्यपदेशात्॥ गतउपासना
विषयः तृतीयशेषो विचारः इदानीं ब्रह्मविद्याफलं प्रतिचिंता क्रियते ब्रह्माधिगमे तद्विरुद्धफलं कर्म्म
क्षीयते न वेति न क्षीयत इति तावत्प्राप्तं नहि कर्म्म क्षीयत इति स्मरणात्॥ अत्राभिधीयते तदधिगमे ज्ञा
नलाभे सत्युत्तरपूर्वयोरघयोः पापयोरश्लेषविनाशौ प्रवेति तस्य जन्मान्तरसंचितस्य अत्रापि ज
न्मनि मा कृतस्य बोधात् न कृतस्य च विनाशो व्यपदेशात् तद्यथेषीकातूलमग्नौ प्रोतं प्रदूयेत एवं हास्य स
र्वे पाप्मानः प्रदूयंत इति तथा क्षीयंते चास्य कर्म्माणि तस्मिन्दृष्टे परावरे इति स्मरणमपि विद्वदि प
षं शास्त्रश्चिन्तनेन वा तो गेनवा न्येषाद्यापोनास्युपेत्यागमीनः॥ पुनरयस्या संश्लेषो विदुषो तद्यथा पुष्क
रपलाश आपो न श्लिष्यन्त एवमेवंविदि पापं कर्म्म न श्लिष्यत इति प्रमाद्योपलब्धमपि ज्ञानवतः सम्यक्
दर्शनान न तत्संदग्धकर्म्म नरस्पती त्वर्थि प्रायः॥ इतरस्याप्येवमश्लेषः पाते तु॥ न केवलपशमः पापस्य

भाष्य·

मादिमतीकेषु उपास्यमत्राद्यम्। केन पुरुषकल्पनामनुरुध्यामहे किमेतु नि दोषि श्रुतानि निर्गतावालो दु
दीलामहे। यत्र विकारो पास्यमैव न बडुक्तितत्र तदेवाव धार्य्यते यत्र सकृत्तु पास्यनं तत्रापि तदेव नाम्नः
प्रमाणान्तरमुक्तं स्यात्। अपि च नाम ब्रह्मेति वेति परो ब्रह्मशब्दः परविशेषणत्वेनैव सम्भवति ना
म च। विशेषणत्वेन हि नीचि उत्कृष्टयोग्यत्वमतोऽपि नामादिष्वेव ब्रह्मदृष्टिविशिष्टनामोपासनं कर्तव्यमि
ति। यदि वा नाम्नः अपि विज्ञायमानत्वं हि विशेषणं न्यायप्राप्तौ लोकमानवेति॥ अथ नाम विकल्पते तस्यैवो
पास्यत्वं प्रसज्यते लक्षणं पाषनायत्वात् बहिर्विधेर्नेयं न परत्वे च बलानुपपत्तिः स्यात्। वाग्वा बनान्यो
मयस्त्वमुपसीतेति सत्रे चैवमवाचक हर्विधिकरणं पदार्थतान सिति सत्रे चैव ग्रवोवाचक हर्विधिकरणं
पदार्थतानां च पत्युषुपि वाक्येतम पहतपाप्म हिरण्य केशादिगुणानामुपलक्षणार्थत प्यसत ब्रह्म
लोके विशेषणत्वात् तदन्यत्र अगुणानामुपलक्षणत्वे हि रे वाहिरे वयथा यत्रार्थे न काकां देदेवस्तस्य
महिमेति॥ ब्रह्मदृष्टिरुत्कर्षात्॥ ते चैवोदाहरणेषु चिन्ता किं ब्रह्मदृष्टिर्मनसि कर्तव्या हिंकारा मनोद
ष्टिरितरत्रेति नियमकारिणः कारणस्याभावात् अनियमे प्राप्ते विधीयते ब्रह्मदृष्टिर्मनस्येव कर्तव्या
कस्मादुत्कर्षात्। यथा राजदृष्टिः क्षत्तरि तिरस्कृत्य परार्थतामापादयति एवं ब्रह्मसाम्यमापाद्यो हीतिश्रा
द्धः॥ आदित्यादिमतयश्चाङ्ग उपपत्तेः॥ य एवासौ तपति तमुद्गीथमुपासीत लोकेषु पञ्चविध

सामोपासीतेत्यत्र वैकल्पिकि कुक्षिः सामेत्यादिषु नियमो नियमहेत्वभावात् ततो लक्षणोपकर्षकृता
विशेषोऽस्तीत्यत्रोच्यते विधीयते आदित्यादिमतयः एवाङ्गेषु उद्गीथादिषु कर्त्तव्याः कस्मादुपपत्तेः आदित्यादिभि
ः कर्माङ्गसंस्कारे सत्तु प्रयोगवच्चनेनगर युक्त इत्युपपद्यते अधिकृता विकारो गोदोहन वनथा लोकाः
साम सु सेव्य तायाः समस्ताः पारार्थ्यावगमात् साम उपासीतेति च साम्नो द्वितीया निर्देशात्तदुपास्यत्
आसीनः सम्भवात्॥ क्रतुगता या उपासना या प्रयोगानुगतत्वात्तथानुष्ठीयते नामादिमतीकेषु परविद्यासु
दहरविद्यादिषु चिन्ता किमासीनः शयानो वासीनो वेति नियमहेत्वभावादनियमः प्राप्तस्तत्र आसीन इ
ति कुतः सम्भवात् तिष्ठतः शरीरधारणे व्यग्रं मनः शयानं च निद्रयाभिभूयते॥ ध्यानाच्च॥ ध्यानं चैतदु
पासनं तदपि समाहितमनस्युपपद्यते ध्यायतीव बक इति प्रयोगदर्शनात्॥ अचलत्वं चापेक्ष्य॥ इतश्च
ध्यायतीव पृथिवीत्यत्राचलत्वमपेक्ष्य ध्यायतिप्रयोगः॥ स्मरन्ति च॥ शुचौ देशे प्रतिष्ठाप्य स्थि
रमासनमात्मन इति शय्या अपेक्षिता मुखरवासने स्वस्तिकासनेनोपविश्य निमीलितनयनो निद्राति
शयान्दे परमात्मचिन्तनाभावे शपेदिति॥ यत्रैकाग्रता तत्राविशेषात्॥ दिग्देशकालेष्वनियम तद्देशे
काले चैकाग्रता तत्रोपासनं कुर्यात्। विशेषश्रवणं त्वनुविषयविशेषाय चित्तमनस्तिः समे शुचौ शर्क
रावह्निवालुकाविवर्जिते शब्दजलाश्रयादिभिः मनोनुकूले न च चक्षुपीडने गुहानिवाताश्रयेण प्रयोज

तिलिङ्गाच्च ॥ २ ॥ इतश्चेश्वर एव मीत्युक्तं पर्य्यावर्त्तयाति तिरस्मिन् दहरोपासनं बहुपुण्यतापे विधीयते ह्यात्र वदति
स्त्र. ग्र. ते तत्सामान्यदित्तरेषु तपालं स्यात् तेषु तत्कन्यायेन ॥ आत्मेति तत्पगच्छंति ग्राहयंति च ॥ योयमप
हतपाप्मादिगुणयुक्तः परमेश्वरः सच्चित्महमात्मे त्ये. व पन्ते देवमति पत्तम्य ॥ किंचान्य इति विषयेर्ज विश्व
स्यो भिन्नतुलन्वात्तेदेवमतिपदिश्यति मामावाह आलेति ॥ तु शब्दः पूर्वपक्षाव्यावृत्त्यर्थः परमेश्वर एव
ध्यायो आत्मेत्येव गृह्णीयात् न तिज्ञापयंति जावालाः त्वंवा अहमस्मि भगवो देवते अहं वै त्वमसि देवते इति ग्राहयंति च
एतत्त्वय एष त आत्मा सर्वांतरः एष त आत्मा अंतर्याम्यमृतः तत्त्वमसीति ॥ ननु निरुद्धगुणयोरन्योन्य
त्रिरयुक्तानायं विरोधो भेदस्य नित्यसिद्धत्वादुपाधिकृतस्तु भेदः सो ऽत्र न वन पापनीयते अन्विसं
पर्केणेव कनकगतमलं ॥ न प्रतीकेन हि सः ॥ मनो ब्रह्मेत्युपासीतेत्यध्यात्ममधिदैवतमाकाशो ब्रह्मेति स
योनाम ब्रह्मेत्युपास्त इत्येवमादिषु प्रतीकोपासनेषु संशयः किमात्मग्रहो स्ति नेति ब्रह्मेत्यात्मोच्यते ॥ अ
त्मविकारेषु कारणानुगतिः स्यात् आत्मग्रह इति पूर्वः पक्षः ॥ नात्मग्रह प्रतीकेन हि सः प्रतीकान्सोपा
स कस्य ब्रह्मविकारत्वादुभयोस्तुल्यत्वादपि तु नं कारणत्वयोस्तीति सत्यं वस्तुतस्त्वोदनादिस्तु विका
रस्यैवोपासनं यथा वासोदद्यात्पनोदद्यातीति चोदनायां न तत्त्वतः काष्ठानि वा दीयंते अत्र कल्प्या नारु
न्वयः केचित्स्त्रापमित्रकृत्स्नोत्रियश्रावकाः सिद्धान्तं ग्राहयन्तो वदंति ॥ नामादिष्वपि जाय नेन ब्रह्मैव ना